मातस्त्वदीयकरुणाकणमेत्य धीरा
मर्त्याः प्रयान्त्यमरतां भुवि भूरिपुण्याः ।
ये त्वत्कृपासुरसरित्तटसंश्रयास्ते
सञ्जीवयन्त्यपि जडानवलोकितेन ॥ ८ ॥
नैवान्तरेण करुणामयि ते प्रसादं
विश्वे कदापि सुलभः सुखशान्तिलेशः ।
इत्थं विविच्य शुभबुद्धिबलेन भाग्यात्
पादारविन्दसविधे मिलिता वयं ते ॥ ९ ॥
अस्मासु मातरधुना कृपया प्रसीद,
सस्नेहमाशु च विलोकय ते सुताश्च ।
दीप्तिः स्थिरा रुचिरपादनखेन्दुजा ते,
ध्वान्तं निवारयतु मोहभवं दुरन्तम् ॥ १० ॥

विलासितां परित्यजेत् ।

अस्ति वङ्गेषु कलिकाता नाम काचित् विशाला नगरी । तत्र विलासाभिधानः कश्चन धनहीनः तरुणो वणिक् प्रतिवसति । एकदा त्वसौ राजवर्त्मना परिभ्रमन् कमपि "इयोरूपभूखण्ड"-वास्तव्यं श्वेताङ्गपुङ्गवं महार्घनेपथ्य-भूषित वपुषमपश्यत् । दृष्ट्वा च तं तेनेदं परिचिन्तितं "अहो धनहीनतया चरणयुगलं मेऽनुपदिनाहीनं शीतलतामिवानुभवति ।" इत्थं परिचिन्तयतस्तस्य ततः प्रभृति सन्ततं "कथमहमनुपदिनायुग्मं क्रेष्यामि" इत्येवं दुश्चिन्ता मनसि बलवती आसीत् । अथ कदाचिद् मध्याह्नवेलायां विद्यालयं प्रति गच्छन् कोऽपि धनिसुतस्तेन विलासेनावलोकितः । शीतर्त्तावपि तस्य धनिपुत्रस्य पदद्वयमनुपदिनाविहीनमवलोक्य स तां पूर्व्वोक्तां दुर्भावनां जहौ ।

गच्छता कालेन तस्य हि धनितनयस्य पादुके अकाल एव छिन्नतां गते । पादुकयोरभावेन आत्मनो दरिद्रतां विचिन्तयन् स परं विषादमुपागतः । एतेनैव विषादेन रजन्यां तस्य निद्राऽपि न समागच्छति । एकदा विनिद्रः स एवं चिन्तितवान् "अहो पिता मे न कथमपि प्रयोजनातिरिक्तमर्थं प्रेषयति, तत् कथमहमुपानद्विहीनः श्वः विद्यालयं गमिष्यामि ? पितुः कठोरे शासने वर्त्तमानस्य मम हस्ते नास्त्येकोऽपि कपर्द्दकः । धनवानप्यहमद्य आत्मनोऽनव-

धावनतया भग्नोपानत् सञ्जातः । छिन्नपादुकस्य सर्व्वत्रैव लज्जाकारणं विद्यते इति तर्कयामि । महती मां बाधते त्रपा विद्यालयगमनाय ।" इत्थं भूयोभूयः मनसा समालोचयता तेन "भवतु, उद्बन्धनेनैव प्राणांस्त्यक्ष्यामि ।" इत्यवधार्य्य शय्यां विहाय वृक्षवाटिकामुद्दिश्य गृहाद् बहिर्गतः ।

प्राचीरमतिक्रम्य गच्छतस्तस्य दैवात् कश्चिदातुरः नेत्रपथं गतः । स च द्वाभ्यामेव पादाभ्यां हीन आसीत् । तं दृष्ट्वा सोऽचिन्तयत् "अहोबत, कथमयमपि द्वाभ्यामेव पादाभ्यां विहीनः प्राणान् धारयति ? तत् कथं मया सबलाभ्यां पादाभ्यां युक्तेन प्राणाः अकाण्डे त्यज्यन्ते ? यातु, अद्य प्रभृति विलासिताविहीन एव छात्रजीवनमतिवाहयिष्यामि ।

खञ्जस्य दृष्टान्तेन धनिसुतस्य तस्य मानससन्तापः दूरं गतः । तथाच—

अधोऽधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्युपरि पश्यन्तः सर्व्व एव दरिद्रति ॥

वक्तृता ।

स तद्रूपः कश्चनैकः सदुपायः स्रष्टव्यः, येनास्मद्देशीया अपरदेशीया वा मातृभाषयेव संस्कृतभाषया अनर्गलां वक्तृतां कर्त्तुं पारयन्तीती*त्युक्तमधस्तात् ।

कस्तावत् स सदुपायः ? किंवदन्ती जल्पनेतिवा प्रसिद्धाः कतिपये वाङ्निचयाः । कुतः संगृहीतास्ते ? लोकेभ्य आत्मनः सकाशाच्च । किम्प्रकारा अमी ? सदुपदेशगर्भत्वेन रहस्यपूर्णत्वेन च सुश्राव्यतया सरसाः वाच्याः, संस्कृतभारती (भाषा) विषयकबहुविधसदुपदेशयुक्तमाश्च, संस्कृतभारती (भाषा) सुशिक्षायां समुपयोगिनश्च । किंतावदपूर्व्वफलं लभ्यते तेभ्यः ? यथाभिलाषं मातृभाषयेव संस्कृतभाषया प्रकथने सामर्थ्यम् । कथम् ? श्रूयताम्, बहव एव लोकाः सुविशुद्धसंस्कृतभाषया निरर्गलं वक्तुं न शक्नुवन्तीत्यत्र को हेतुः ? द्वावेव हेतू अत्रोपलभ्येते । एको हेतुस्तावद्वक्तव्यविषयस्यानुपस्थितिः । द्वितीयो हेतुः, उपस्थितानामपि वक्तव्यविषयाणां सम्यक्प्रकाशीकरणासामर्थ्यम् । दृश्यत एवं बहुशः ।

---

* अस्यां रचनायां भगवतां महाभाष्यकृतां रचनाशैली अवलम्बिता । तैरेवंविधस्थले (अर्थात् कस्यचिद्विषयस्य सुबोधयितव्यतायां) प्रश्नोत्तररूपैव रचना समादृता । साध्वीयं शैली । झटिति वक्तव्यविषयावगतेरिति ।

भाषायां सुप्रवीणा अपि किं तावद् वक्तव्यमित्यवधारयितुमक्षमाः किमपि न वक्तुं पारयन्ति । यथा भाषामात्रविदः केवलवैयाकरणाः । केचिद् वा अवधारितवक्तव्यविषयाः, किन्तु भाषायामपाटवेन मनोगतार्थानां प्रकाशे सामर्थ्यविरहात् मूका इव निवसन्तीति । स च सामर्थ्यविरहस्त्रिधा घटते । भाषानभिज्ञतया, रीत्यनभिज्ञतया, प्रयोगविशेषानभिज्ञतया च । केचित् समधिगतविषया अपि भाषायां तादृशाधिकारविरहेण संस्कृतभाषया भाषणप्रस्तावे न किंचन वक्तुमलम् । यथा शुष्कतार्किकाः । अर्थात् शब्दशास्त्राद्यालोचनविहीनाः, केवलेषु तर्केष्वेव निक्षिप्तमनसः । केचिद्वा उपस्थितविषया भाषायामपि सुनिपुणाः, किंत्वनवगतकथनरीतयः, तेऽपि सम्यक् प्रकाशयितुमशक्ता मनोगतानर्थान् वक्तृतायां न लब्धयशसो भवन्ति । यथा काव्यालङ्कारादिशास्त्रचर्च्चाशून्या मनीषिणः । केचन वा तादृशा अपि मातृभाषाप्रयोगानुरूपप्रयोगावैज्ञानिकतया सर्व्वविधं प्रकाश्यं वस्तु न प्रकाशयितुमीशते । यथा वर्ज्जितसंस्कृतसंलापा मध्यदेशवासिनः । इत्यभिहिताः वक्तृताशक्तिसंस्तम्भनहेतुभूता एता विषमा दुर्गतयः * संस्कृतभाषया विवक्षूणाम् ।

पर्य्यालोचितेषु सत्सु तु, मन्मनसि समवस्थितेषु, प्रकाशयितुमभिप्रेतेषु किंवदन्तीति जल्प इति वा विख्यातेषु, तेषु वचनजातेषु † ततः समुत्थितेन तद्विषयकप्रज्ञानेन समुच्छिद्येत मूलं तासां सर्व्वासामेव दुर्गतीनाम् । तथाहि तेषां बहुविषयकत्वेन तदालोचनया निरन्तरं वक्तव्यविषयप्रस्फुरणेन वक्तव्यविषयानुपस्थितिरूपो यो दोषः स सुदूरमपसार्य्येत । प्रदर्शितसंस्कृतभाषाङ्गप्रत्यङ्गभूतसुप् तिङ्-कृत्तद्धित कारक-समासादिभूरिप्रयोगतया च समनोयोगपाठकानां भाषायां सम्यगधिकारोदयेन भाषानभिज्ञतारूपदोषोऽपि पलायेत, पलायितश्च न स पुनरावर्त्तेत । व्यवहृततया चैषु (वचनजातेषु) बहुविधानां रचनाशैलानां, सूक्ष्मदर्शिपाठकवृन्दस्य कथनरीत्यनभिज्ञतानिबन्धनं यन्मनोगतार्थप्रकाशविषये जाड्यं, तदपि व्यपगच्छेत् । स्पष्टतया च मातृभाषाप्रयोगानुसारिभिः प्रयोगैः, तेभ्यस्तादृश–(मातृभाषाप्रयोगानुरूप) प्रयोगाणामधिगमेन "कथमयमर्थः प्रकाशयितव्यः संस्कृतभाषया" इत्याकारकस्त्रासोऽपि परित्यजेद् हृदयं, यं कमप्यर्थं सुष्ठु प्रकाशयितुमिच्छूनां वक्तॄणाम् ।

* वक्तव्यविषयानुपस्थितिभाषानभिज्ञतादिरूपाः दुर्गतयः ।

† वचनजातेषु वाक्यसमूहेष्वित्यर्थः ।

इति निःशङ्कोचा निरङ्कुशाः सर्व्वे मातृभाषयेव संस्कृतभाषया वक्तुं शक्नुयुरित्याशंसा। *

सङ्कल्पयन्ति कतिधाऽज्ञानिनो ज्ञानिमानिनः।
सिद्धं पुनस्तदेव स्यात्, तेन † सङ्कल्पितं हि यत्॥

स्यादवम् ‡ ममेयमाशंसा (मद्रचितानां जल्पनेति प्रसिद्धानां वचननिचयानां पर्य्यालोचनया सर्व्वे मातृभाषयेव यथाकामं संस्कृतभाषया वक्तुं शक्नुयुः इति) विनष्टबुद्धिनाम्नो वृद्धस्याशंसेव भवति। कथम्—

कस्यांचिदेकस्यां स्थल्यां विनष्टबुद्धिनामधेय एको वृद्धो वसति स्म। स यदा पञ्चत्रिंशद्वर्षवयया आसीत्, तदा तस्य पत्नीवियोगो जातः। तदानीं तस्य सन्निबन्धनदुःखसमूहमनुभवद्भिः सर्व्वैरेव स्वजनैः पुनःपरिणयाय बहुधा बहुशोऽनुरुद्धः। स तु कथमपि तदा तं (पुनःपरिणयं) नैच्छत् तज्जनितदोषसमुदायमाशङ्कमानः। आशङ्कमानश्च स्वकीयजीवनं प्रति, स्वापेक्षया अल्पवयसोऽपि पत्न्याः परिप्रस्थानेन (मरणेन)। किन्तु यदा तस्य वयः पञ्चपञ्चाशद्वर्षीयमभूत्, तदापुनस्तस्य विवाहाय मतिरुदपादि। ‖

आशंसितं च तदा तेनेदं सर्व्वम्—

(क)

मया यद्यधुना परिणीयते काचिदेका यौवननिलिप्रपदा बालिका, तदा सा किमनुरागिणी न भवेन्मयि ¶ ? अपितु अवश्यमेव भवेत्।

"हिंसाशीलापि दुष्टा गौः वशीभवति सेविता।
प्रमदा सा न वश्या स्याद् देवीव सेविताऽनिशम्॥"

---

* समुच्छिन्नलोतात्यादिषु शक्नुयुरित्यन्तेषु सर्व्वेष्वेव क्रियापदेषु आशंसावचने लिङ्। शक्नुयुरित्याशंसेत्याशंसापदस्य सर्व्वत्र संबन्धात्। अत्र अभित्तशब्दस्य समर्थशब्दस्य च समानार्थकाः शब्दा बहवः, बहवश्च लिङ्प्रयोगा दर्शिता इति।

† तेन धात्रा।

‡ भवितुमर्हत्येतमित्यर्थः। अर्हे कृत्यतृचश्चेति लिङ्।

§ एको वृक्षः पञ्चनौका भवतीति प्रयोगवदत्राप्येकवचनम्।

‖ त्विष् ते पद इति कर्त्तरि च्लेश्चिण्। अस्यामाख्यायिकायामुपदिष्ट विषयस्तावदेषः। सर्व्वेषामेवावस्थानुरूपकार्य्ये एव प्रवृत्तिर्विधेया। अन्यथा हत्त मनिष्टमुपतिष्ठत इति।

¶ सम्भावनेऽलमिति चेत् सिद्धाप्रयोग इति लिङ्। एवं परत्रापि।

(ख)

मत्सेवया वशीभूता सती मामप्यवश्यं सा सुसेवेत ।

"शुश्रूषते वशीभूता मार्ज्जारी कुक्कुरी मृगी ।
सेविता मां न सेवेत मानव्यपि प्रिया प्रियम् ॥"

(ग)

तद्विधया प्रियया परिसेवितोऽहं यथेष्टं सुखमनुभवेयम् ।

"सुखायते * वृद्धयापि रूपयौवनशून्यया ।
सेवितः, सेवितो न स्यां सुखी वनितया तया ॥"

(घ)

सापि सुखमनुभवेत्, यदि चाहं वृद्धस्तथापि ।

"बालिकाहमयं वृद्धः मिलनं कथमावयोः ।
बुद्धिरेषा तावदेव यावत् प्रीतिर्न वै मिथः ॥"

(ङ)

आवयोः परस्परं प्रियतायां सञ्जातायां उभयोरेव जीवनं सुखमयं भवेत् ।

"सौहार्द्दं यत्र दम्पत्योः प्रगाढं जायते मिथः ।
वयोन्तरस्तयोरत्र कोऽभावो भवितुं प्रभुः ॥"

इत्येवं बहुविधमाशंसितं विवाहोत्सवसमुत्सुकेन तेन वृद्धेन । किन्तु ।

"सस्पृहं युवतीष्वेव वृद्धस्यापि मनो मम ।
वृद्धाय मह्यं तरुणी, कथं सा स्पृहयिष्यती "—

त्येतत्र चिन्तितं तेन सकृदपि । कुतो नोदितवतीयं चिन्ता? प्रकृतिस्थताविरहात् । यतः—

"प्रकृतिस्थो नरो यावत् तावदेव विवेकवान् ।
मुमूर्षुरातुरः किं स्यात् कुपथ्येष्वपि निस्पृहः ॥ † इति ।

अथासौ पुनः पाणिपीडनाय कृतनिश्चयः, धनादिना तोषितमनसः कस्य चिदेकस्य योजयितुः (घटकस्य) साहाय्येन परिणीतवान् एकां षोडशीं रमणीम् । परिणीतवानेव । किंतु यद् यदाशया कृतपरिणयः । न किमपि सिद्धमभूत् तेषां ‡

---

* सुखमनुभवतीत्यर्थः ।

† मया यद्यधुनेत्यादिना निःस्पृह इतीत्यन्तेन कथाया-उपचितीकरणरीतिः प्रदर्शितेति ।

‡ तेषामाकांक्षितानां मध्ये ।

तस्य । तस्याः परितोषाय सर्व्वथा प्रयतमानोऽपि कथमपि न तां तोषयितुमशकत् * । ततश्च स्वयमपि न परितुष्टिमलभत । वरं बहुधा विडम्बित इतः पूर्व्वं यच्छान्तिसुखमासीत् तेनापि वञ्चितोऽभवदिति । परिशेषे कतिपयाहोभ्यः परमेव तस्य सा दुर्व्वहनवयौवनभारवाहितया, अस्थिरमना रमणी, नितान्तनिष्ठुरहृदया सती, अपहृततदीयसर्व्वस्वा, परिवञ्च्य च प्राणेभ्योऽपि प्रियतमतया मतवन्तं, तं प्रणयसमासक्तमृत्युं स्वामिनं कयाचिदेकया पार्श्वभवनस्थया प्रियसख्या समं प्रस्थितवती यथाभिलषितस्थल्याम् । नात्यद्भुतं कार्य्यमिदं तदीयम् । यतः ।

"स्त्रियः पुत्राः प्रियाश्चान्ये सम्मिलन्ति मिथः परम् ।
कोऽपि कस्यापि नैवात्र सर्व्वे स्वार्थवशा भुवी" ति ॥

ततः स वृद्धः प्रियया हृतसर्व्वस्वोऽपि
"या मे प्रिया सबहुमानमपि प्रदत्तं,
पूर्व्वं न वै किमपि वस्तु जिघृक्षुरासीत् †
दिष्ट्या मयि प्रियतयाद्य तया गृहीतं,
मत्वा ममेति मम सर्व्वमहो नु भाग्यम्"

इति समालोच्य तथा परमां मुदमन्वभूत् । पश्चात्, बहुना कालेन बहुना प्रयासेन सञ्चितानां तावतामेवार्थानां क्षयेण, परित्यागेन च स्वस्य, दुःसहं दुःखमनुभूय, गद्गदमभिधायेदं रोदितुमारभत ।

"वस्तुजातं व्यरोचिष्ट मदीयं सर्व्वमेव ते ‡" ।
नाऽरोचिषि वरारोहे हन्ताहमेव केवल ॥ इति

इदानीमुक्तं भवतीदम् । यथा कोऽपि न लाभो भूतस्तस्य वृद्धस्य, तदवस्थायां कृतेन तेन विवाहेन । केवलं परितापलाभ एव लाभानाम् । भवेदेवम् । (भवितुमर्हत्येवम्) ममापि तथैव भवेत्, अकीर्त्त्यादिरूपफललाभ एव, परोपकृतिजनिता पूर्व्वफललाभलोभेन अस्यां वार्द्धक्यावस्थायां विरचितेभ्य एभ्यः प्रबन्धेभ्यस्तद्विनिमयेन । तदेवाभिधीयते ।

---

* अनद्यतनत्वाद्विवक्षातो लुङेव ।

† या मे प्रिया पूर्व्वं सबहुमानं बहुप्रमादरक्षितं मया प्रदत्तमपि किमपि वस्तु न जिघृक्षुरासीत् न ग्रहीतुमैच्छदित्यर्थः ।

‡ ते तुभ्यमित्यर्थः ।

"(स्याद्देवम्) * ममेयमाशंसापि विनष्टबुद्धिनामकवद्दुस्याशंसेव भवती" ति अभिहितं च तथा । पूर्व्वमपि संकल्पयन्ति कतिधाऽज्ञानिनो ज्ञानिमानिन" इत्यादीति ।

अथ यद्येवमाशङ्कमानोऽसि कथमत्र तर्हि प्रवर्त्तेथ इति पृच्छसि चेत् । तदुत्तरमेतत् ।

"कर्त्तव्यमेव † कर्त्तव्यं निष्कामेन सता सता ।
इति बुद्ध्या प्रवर्त्ते ‡ ऽहं पुनरप्यत्र कर्म्मणी ॥ ति शिवम् (क्रमशः)

नर्म्मालापः ।

(छात्राणां वर्ज्जनीये)

एकदा विप्रः कश्चिद् देशाद्देशान्तरं परिभ्रमन् कस्यापि वृषलस्य भवनमुपागम्य तत्रों तत्र विश्रम्य च तं रहस्यमपृच्छत् "अये ! कतिभिस्तावत् सन्तानैर्भवान् भगवताऽनुगृहीतः ?"

शूद्र उवाच–महात्मन् ! एकमात्रमेव मे पुत्रः, नास्ति द्वितीयः कश्चित् ।

ब्राह्मणः–अपि तस्य धूमपानाभ्यासो विद्यते ।

शूद्रः–नहि नहि; स तु ताम्रकूटानामपरेषां वा केषांचिद् मादकद्रव्याणां न करोति स्पर्शमपि ।

ब्रा:–अहो सौभाग्यं भवतः । स्वास्थ्यं तस्य वस्तुत एव चतुरणां स्यास्यति । यातु, किं स मन्दबालकैः सह बंभ्रम्यमाणः संसर्गदोषाद् गुरुजनान् अवमन्यते ।

अहो किमिदमुच्यते ? सोऽस्माकं वतुषामप्यन्तरालं न गच्छति ।

साधु, साधु, धन्यस्त्वमेतादृशेन पुत्ररत्नेन । नूनं स चिरायुर्भवेत्, विद्यामपि पुष्कलामेव लप्स्येत । किन्त्वयमेवाधुना दुःखावहः यदीदानीन्तना

---

* यत् कर्त्तव्यं तत् कर्त्तव्यमेवेत्यन्वयः ।

† यादृशवाक्योपक्रमः कृतः तादृश वाक्येनैवोपसंहारः कर्त्तव्य इति प्राचां रीतिः । सैवात्रसम्भिताऽस्यां रचनायामिति । साध्वीयं रीतिः । प्रासङ्गिकविषयाणां विस्तृतत्वेऽपि कि सत्यममं नोत्पादयेत् श्रोतृणामिति ।

‡ फलाभिसन्धानशून्यपुरुषाणां कर्त्तव्यबुद्ध्या कर्त्तव्यकार्य्यानुष्ठाने दैवादुत्पन्नमप्यनिष्टं नातिखेदकरमिति भावः ।

अनेक एव बालका नानुतिष्ठन्ति एतेषां किंचिदपि। यातु तत्, किमहं त्वां पृच्छामि? कतमश्वर्षदेशीयोऽसौ भवतस्तनय इति?

वृ०–भवादृशानामाशिषा महात्मन्! स मे सुतः साम्प्रतं पञ्च मासान् अतिक्रामति। श्रुत्वा चेतद्, ब्राह्मणः "अहो वाग्जालं मे वृथैव व्ययितमिति विचिन्त्य विमर्शतां गतः।

(वृद्ध-विस्मृतौ)

कश्चिद् धर्म्मयाजको देशाद्देशान्तरं बंभ्रम्यमाणश्चट्टले स्थविरमेकं कृषक-मवलोक्य तमपृच्छत्। 'अयि वृद्ध! जागर्त्ति किं हृदये तवेदानीमपि उद्दामयौवनस्य व्यसनिता? स्मरसि किं जीवनशेषदिनस्य?" वृद्धः प्रत्युवाच "कथं निष्फलवाग्मिता भवतः कृषकमपि मां न परित्यजति? नाहमवगच्छामि भद्र! तव प्रश्नानामुत्तरवाचः" ॥

याजकः (तथा विमृश्य) अपि त्वं कथयितुमलं कस्तव सृष्टिकर्त्तेति? कृषकः कथञ्चिद् विरक्तिं प्रदर्शयन् प्राह "नाहं जानामि महात्मन् मम स्रष्टारं तस्य पूर्व्वपुरुषं वा, न कदापि मया सृष्टिकर्त्ता वीक्षितः न तेन सह किंचिदपि भाषितम्। कः किल वक्तुमर्हेत् को मामसृजत् त्वां वाऽसृजदिति"। तदानीं तेन पथा गच्छन् कश्चिद् बालकस्तेन याजकेन पृष्टः–"जानासि किं शिशो! कस्तव सृष्टिकर्त्तेति"। बालकः सहर्षमभाषत–"सृष्टिकर्त्ता मे परमेश्वरः"। तदा स धर्म्मयाजको यावत् वृद्धं तिरस्कृत्य बालकं च पुरस्कृत्य गन्तुमारेभे तावत् स कृषकस्तमाहूय प्रोवाच–"शृणु भोः! अयं हि बालकः कतिपयदिवसान् यावत् जन्म जग्राह, अतोऽधुनापि तस्य स्मृतौ स्पष्टमेव प्रतिभासते कः सृष्टिकर्त्तेति। मम तु अशीतिपरस्यविरस्य स्मृतिशक्तिर्बहुदिनमेव लुप्ता। तत् कथं भो वृथा मां निन्दसि?"

(परिदर्शकमाहात्म्य)

कश्चिद् राजा स्वकीयघोटकयूथपालनाय रक्षकमेकं तिलकनामधेयं नियुक्तवान्। तेषां तु घोटकानां पानार्थं 'मण'–परिमितं दुग्धं प्रात्यहिकं निर्द्दिष्टमासीत्। अश्वपालो हि तिलकस्तस्माद् दुग्धात् प्रतिदिनमेव कियदात्मसात् करोति। अथ राजा तस्मै सन्दिह्य द्वितीयमपरमश्वपालं न्ययुङ्क्त परिदर्शकस्वरूपम्। ततः प्रभृति स परिदर्शकः आत्मनः शिशुसन्तानेभ्यः प्रत्यहमेव तस्माद् दुग्धात् प्रचुरमपहर्त्तुमारेभे। इत्यमपगते कतिपये काले भूमिपतिः परिदर्शकमपि

तं मन्दिरस्य तृतीयमेकं राजकर्म्मचारिणं अश्वपालपर्य्यवेक्षकपदे विनियुज्य स्वस्थस्तिष्ठति। अथ कदाचिद् राजा स्वयं मन्दुरामागत्य तुरङ्गमगणं क्षणतरमवालोकयन् सम्मुखस्थिते दुग्धभाण्डे दृष्टिं चकार। तत्र च तदा दैववशात् धवलदुग्धोपरि श्यामलः कश्चित् शैवालस्तेन दृष्टः। राजा सविस्मयस्तं प्रथमाश्वपालमपृच्छत्—"रे तिलक! कथं दुग्धेऽस्मिन् शैवालः प्रतिभासते।" तिलकस्तु भीतभीत इव बद्धाञ्जलिरवादीत्—"महाराज! पुरा यदाहमासम् एक एव दुग्धापहारकस्तदा त्विमे वाजिनः नासन् दुर्ब्बलाः कृशाश्च। किन्तु भवत एव कृपया अपरावपि तस्करौ मम भागहरौ नियोजितौ। अतश्च भवान् अधुना दुग्धे शैवालं विलोकयति, अपरश्चेत् चतुर्थश्चोरो भवता रक्ष्यते तदा तूर्णमेव त्वं दुग्धे मत्स्यक्रीडामपि विलोकयिष्यसि, नास्त्यत्र सन्देहलेशोऽपि कश्चित्।

राजकरणावश्यककथनम्।

(महाभारतस्य शान्तिपर्व्वणः अन्तर्वर्त्तिनो राजधर्म्मपर्व्वणः समुद्धृतम्)।

घोरे संग्रामे प्रवृत्तः महाधनुष्मान् भीष्मदेवः सहसा पुरत उपस्थितं शिखण्डिनं विलोक्य धनुर्व्विजही युद्धाच्च विरराम। तदा अर्ज्जुनेन महता वेगेनाक्रान्तः भीष्मः शरशय्यामधिशिश्ये, महान्तं क्लेशं चाभजत्। भगवता श्रीकृष्णेन अतिमात्रं प्रणोद्यमानः तपःसुतो युधिष्ठिरः विविधानि शास्त्राणि शिक्षितुं महामतिं महाप्राज्ञं पितामहमभिपेदे। स च अत्यादरेण युधिष्ठिरकृतान् नानाशास्त्रविषयकान् प्रश्नान् प्रति निपुणमुवाच। विविधकथाप्रसङ्गेनासौ राज्ञः अवश्यकर्त्तव्यादिकमपि अनुशशास। अथ कथारम्भः स्यात्।

युधिष्ठिर उवाच।

चातुराश्रम्यमुक्तं ते, चातुर्व्वर्ण्यं तथैव च।
राष्ट्रस्य यत् कृत्यतमं तन्नो ब्रूहि पितामह ॥ १ ॥

भीष्मउवाच।

राष्ट्रस्यैतत् कृत्यतमं, राज्ञ एवाभिषेचनम्।
अनिन्द्रमबलं राष्ट्रं, दस्यवोऽभिभवन्त्युत ॥ २ ॥

चातुराश्रम्यं-चत्वार एव आश्रमाः ब्रह्मचारि-गृहि-वानप्रस्थ-भिक्षुकाख्याः; चातुर्व्वर्ण्यं चत्वार एव वर्णाः ब्राह्मण-क्षत्रिय-वैश्य-शूद्ररूपाः; राष्ट्रस्य,="राष्ट्रवासिनः जनस्य" कृत्यतमं — "मुख्यकार्य्यं", पितामह—भो भीष्मदेव! अनिन्द्रं—इन्द्ररहितम् अराजकम् इत्यर्थः ॥ १-२ ॥

अराजकेषु राष्ट्रेषु, धर्म्मो न व्यवतिष्ठते ।
परस्परं च खादन्ति, सर्व्वथा धिगराजकम् ॥ ३ ॥
इन्द्रमेव प्रवृणुते, यद्राजानमिति श्रुतिः ।
यथैवेन्द्रस्तथा राजा, सम्पूज्यो भूतिमिच्छता ॥ ४ ॥
नाराजकेषु राष्ट्रेषु, वस्तव्यमिति रोचये ।
नाराजकेषु राष्ट्रेषु, हव्यमग्निर्वहत्युत ॥ ५ ॥
अथ चेदभिवर्त्तेत, राज्यार्थी बलवत्तरः ।
अराजकानि राष्ट्राणि, हतवीर्य्याणि वा पुनः ॥ ६ ॥
प्रत्युद्गम्याभिपूज्यः स्या, देतदत्र सुमन्त्रितम् ।
नहि पापात् परतरमस्ति किञ्चिदराजकात् ॥ ७ ॥
स चेत् समनुपश्येत, समग्रं कुशलं भवेत् ।
बलवान् हि प्रकुपितः, कुर्य्यान्निःशेषतामपि ॥ ८ ॥
भूयांसं लभते क्लेशं, या गौर्भवति दुर्दुहा ।
अथ या सुदुहा राजन्नैव तां वितुदन्त्यपि ॥ ९ ॥
यदतप्तं प्रणमते, नैतत् सन्तापमर्हति ।
यत् स्वयं नमते दारु, न तत् सन्तापयन्त्यपि ॥ १० ॥
एतयोपमया वीर, सन्नमेत बलीयसे ।
इन्द्राय स प्रणमते, नमते यो बलीयसे ॥ ११ ॥
तस्माद्राजैव कर्त्तव्यः, सततं भूतिमिच्छता ।
न धनार्थो न दारार्थस्तेषां येषामराजकम् ॥ १२ ॥

धर्म्मो न········"लोकाः अन्योन्यं धर्म्मव्यवस्थापनं न कुर्व्वन्ति"। इति श्रुतिः=एवं वेदात् अधिगम्यते, भूतिम्-सम्पदम् ॥ ३-४ ॥ रोचये=अभिलषामि, हव्यं-हवनीयम्, आज्यादिकम्; अभिवर्त्तेत,=आगच्छेत् ॥ ५-६ ॥ प्रत्युद्गम्यः-पूज्यः-महतादरेण प्रत्युत्थाय आदौ गमनीयः, पश्चात् अभिपूज्यः अर्च्चनीयः, माननीयः इतियावत् राष्ट्रस्थितैः जनैरिति शेषः। सुमन्त्रितम्=शोभना व्यवस्था; परतरं श्रेष्ठतरम्, समनुपश्येत=सम्यक् विचारं कुर्य्यात्, कुर्य्यात् अपि=लोकादीन् निरवशेषान् विदध्यात् ॥ ७-८ ॥ भूयांसम्=महत्तरम्, अत्यधिकं इतियावत्; दुर्दुहा-दुःखेन क्लेशेन दोहनीया। सुदुहा-सुखेन दोहनीयाः वितुदन्ति-क्लिश्यन्ति दोहकाः इति शेषः; अतप्तं-अपीड़ितम्; दारु-काष्ठम्; न सन्तापयन्ति अग्निना न पोड़यन्ति जनाः इति शेषः ॥ ९-१० ॥ सन्नमेत बलीयसे=बलवतो राज्ञो वशं गच्छेत्; राष्ट्रस्य कुशलं अकुशलंच यथाक्रमं आगन्तुकस्य राज्ञः प्रसादे प्रकोपे वा अपेक्षते। न धनार्थः—"धनस्य उपभोगः नास्ति" इत्यर्थः; न दारार्थः—

प्रीयते हि हरन् पापः, परवित्तमराजके ।
यदास्य उद्धरन्त्यन्ये, तदा राजानमिच्छति ॥ १३ ॥
पापा ह्यपि तदा क्षेमं, न लभन्ते कदाचन ।
एकस्य हि द्वौ हरतो, द्वयोश्च बहवोऽपरे ॥ १४ ॥
अदासः क्रियते दासो ह्रियन्ते च बलात् स्त्रियः ।
एतस्मात् कारणाद्देवाः प्रजापालान् प्रचक्रिरे ॥ १५ ॥
राजा चेन्न भवेल्लोके, पृथिव्यां दण्डधारकः ।
जले मत्स्यानिवाभक्ष्यन् दुर्ब्बलं बलवत्तराः ॥ १६ ॥
अराजकाः प्रजाः पूर्व्वं, विनेशुरिति नः श्रुतम् ।
परस्परं भक्षयन्तो, मत्स्या इव जले कृशान् ॥ १७ ॥
समेत्य तास्ततश्चक्रुः, समयानिति नः श्रुतम् ।
वाक्शूरो दण्डपरुषो, यश्च स्यात् पारजायिकः ॥ १८ ॥
यः परस्वमथादद्यात्त्याज्या नस्तादृशा इति ।
विश्वासार्थं च सर्व्वेषां, वर्णानामविशेषतः ॥
तास्तथा समयं कृत्वा, समयेनावतस्थिरे ॥ १९ ॥
सहितास्तास्तदा जग्मुरसुखार्त्ताः पितामहम् ।
अनीश्वरा विनश्यामो, भगवन्नीश्वरं दिश ॥ २० ॥
यं पूजयेम सम्भूय, यश्च नः प्रतिपालयेत् ।
ततो मनुं व्यादिदेश, मनुर्नाभिननन्द ताः ॥ २१ ॥

'दारायां भार्य्यायाः उपभोगः नास्तीत्यर्थः ॥ ११-१२ ॥ पापः-पापासक्तो जनः, उद्धरन्ति बलात् आत्मसात् कुर्वन्ति, क्षेमं-कुशलं विघ्नराहित्यम् ; एकस्य-एकस्य वित्तम् ॥ १३-१४ ॥ प्रजापालान्= प्रजा-रक्षकान् नृपान् ; दण्डधारकः=शासिता, अभक्ष्यन्-अखादिष्यन्-व्यापादितवन्तः इति, यावत् ॥ १५-१६ ॥ विनेशुः-ध्वंसं प्राप्तवन्तः ; नः श्रुतं अस्माभिरेवं पुरातनी वार्त्ता आकर्णिता ; कृशान्-चोणबलान् अपरान् मत्स्यान् ; वाक्शूरः-'निष्ठुरभाषी' दण्डपरुषः=उग्रदण्डः, पारजायिकः=परस्त्रीगामी ॥ १७-१८ ॥ अविशेषतः निर्व्विशेषं ; समयं-नियमं, असुखार्त्ताः- "दुःखपीड़िता" "असुखार्थाः" इति पाठे-"सुखैरर्थैश्च हीनाः" पितामहं प्रजापतिं ब्रह्माणं ; अनीश्वराः-नायकरहिताः-अराजका इति यावत् । दिश-आदिश देहि इति यावत् ॥ १९-२० ॥ सम्भूय मिलित्वा ; व्यादिदेश-नृपत्वेन आदिष्टवान्, अभिननन्द अङ्गीचकार ताः-प्रजाः इति शेषः ।

मनुरुवाच ।

बिभेमि कर्म्मणः पापाद्राज्यं हि भृशदुस्तरम् ।
विशेषतो मनुष्येषु, मिथ्यावृत्तेषु नित्यदा ॥ २२ ॥

भीष्म उवाच ।

तमब्रुवन् प्रजा मा भैः, कर्त्तृनेनो गमिष्यति ।
पशूनामधिपञ्चाशद्धिरण्यस्य तथैव च ॥ २३ ॥
धान्यस्य दशमं भागं, दास्यामः कोषवर्द्धनम् ।
कन्यां शुल्के चारुरूपां, विवाहेषूद्यतासु च ॥ २४ ॥
मुखेन शस्त्रपत्रेण, ये मनुष्याः प्रधानतः ।
भवन्तं तेऽनुयास्यन्ति, महेन्द्रमिव देवताः ॥ २५ ॥
स त्वं जातबलो राजा, दुष्प्रधर्षः प्रतापवान् ।
सुखे धास्यसि नः सर्व्वान्, कुबेर इव नैर्ऋतान् ॥ २६ ॥
यञ्च धर्म्मं चरिष्यन्ति, प्रजा राज्ञा सुरक्षिताः ।
चतुर्थं तस्य धर्म्मस्य, त्वत्संस्थं वै भविष्यति ॥ २७ ॥
तेन धर्म्मेण महता, सुखं लब्धेन भावितः ।
पाह्यस्मान् सर्वतो राजन् देवानिव शतक्रतुः ॥ २८ ॥
विजयाय हि निर्याहि, प्रतपन् रश्मिमानिव ।
मानं विधम शत्रूणां, जयोऽस्तु तव सर्व्वदा ॥ २९ ॥
स निर्य्ययौ महातेजा, बलेन महता वृतः ।
महाभिजनसम्पन्नस्तेजसा प्रज्वलन्निव ॥ ३० ॥

भृशदुस्तरं—भृशं अत्यर्थं दुःखेन तर्त्तुं शक्यं, राज्यशासनं हि अतीवकष्टसाध्यम् इत्यर्थः। मिथ्यावृत्तेषु=अनृतकार्य्येषु; नित्यदा (अव्ययम्) नित्यं ॥ २१–२२ ॥ मा भैः–भयम् मा गच्छ; पशूनां ·········· तथैवच=अधिपञ्चाशत् पञ्चाशतं अधिकृत्य पञ्चाशत्पशुलाभे एकं भागं तुभ्यं दास्यामि इत्यर्थः। तथैव हिरण्यस्यापि, कन्यां ············ उद्यतासु=उद्यतासु सज्जितासु–"कन्यासु शुल्के मौल्य-प्रसङ्गे सति, सुरूपां कन्यां तुभ्यं दास्यामि इति पूर्व्वेण अन्वयः"। विवाहेषु ततासु च इति प्राचां पण्डितानां पाठः। "इयं मया क्रेया इति विवादविषयासु" ॥ २३–२४ ॥ मुखेन-मुख्यतः; आदौ–प्रथमम् इत्यर्थः, शस्त्रपत्रेण–शस्त्रेण वाहनेन च, प्रधानतः श्रेष्ठाः, धास्यसि–पालयिष्यसि नैर्ऋतान्-राक्षसान् ॥ २५–२६ ॥ त्वत्संस्थं–त्वयि प्रतिष्ठितं; भावितः सम्वर्द्धितः शतक्रतुः–इन्द्रः ॥ २७–२८ ॥ रश्मिमान् सूर्य्यः। मानं–दर्पं, विधम–नाशय; महाभि·········· सम्पन्नः–महता श्रेष्ठेन अभिजनेन आभिजात्येन (अभितःस्थितेन जनेन वा) सम्पन्नः युक्तः– ॥ २९–३० ॥

तस्य दृष्ट्वा महत्त्वं ते, महेन्द्रस्येव देवताः ।
अपतत्रासिरे सर्व्वे, स्वधर्म्मे च दधुर्मनः ॥ ३१ ॥
ततो महीं पर्य्ययौ, पर्ज्जन्य इव वृष्टिमान् ।
शमयन् सर्व्वतः पापान् स्वकर्म्मसु च योजयन् ॥ ३२ ॥
एवं ये भूतिमिच्छेयुः, पृथिव्यां मानवाः क्वचित् ।
कुर्य्यूराजानमेवाग्रे, प्रजानुग्रहकारणात् ॥ ३३ ॥
नमस्येरंश्च तं भक्त्या, शिष्या इव गुरुं सदा ।
देवा इव च देवेन्द्रं, तत्र राजानमन्तिके ॥ ३४ ॥
सत्कृतं स्वजनेनेह, परोऽपि बहु मन्यते ।
स्वजनेन त्ववज्ञातं, परे परिभवन्त्युत ॥ ३५ ॥
राज्ञः परैः परिभवः, सर्व्वेषामसुखावहः ।
तस्माच्छत्रं च पत्रं च, वाह्यान्याभरणानि च ॥ ३६ ॥
भोजनान्यथ पानानि, राज्ञे दद्युर्गृहाणि च ।
आसनानि च शय्याश्च, सर्व्वोपकरणानि च ॥ ३७ ॥
गोप्ता तस्माद्दुराधर्षः, स्मितपूर्व्वाभिभाषिता ।
आभाषितश्च मधुरं, प्रत्याभाषेत मानवान् ॥ ३८ ॥
कृतज्ञो दृढ़भक्तिः स्यात् संविभागी जितेन्द्रियः ।
ईक्षितः प्रतिवीक्षेत, मृदु वल्गु च सुष्ठु च ॥ ३९ ॥
इति राजकरणावश्यककथने सप्तषष्टितमोऽध्यायः ॥

युधिष्ठिर उवाच ।

किमाहुर्दैवतं विप्रा राजानं भरतर्षभ ।
मनुष्याणामधिपतिं, तन्मे ब्रूहि पितामह ॥ १ ॥

अपतत्रासिरे-भयं प्राप्ताः; पर्ज्जन्यः-मेघः ॥ ३१-३२ ॥ सत्कृतं आदृतम्,-परिभवन्ति अवमन्यन्ते, पत्रं-वाहनं, वाह्यानि-यानानि ॥ ३५-३६ ॥ गोप्ता-रक्षकः, स्मित-भाषिता-मधुरभाषी, प्रत्याभाषेत-प्रतिवाक्यं कथयेत् । ३७।३८ ॥ संविभागी-धनादीनां विभागं कृत्वा भोक्ता; प्रतिवीक्षेत-पुनर्दृष्टिपातं कुर्य्यात्; वल्गु-शोभनं । सुष्ठु = अत्यर्थं ॥ ३९ ॥

दैवतम्-देवतामेव, भरतर्षभ-भो भरतवंश्यानां श्रेष्ठ; इतिहासम्-प्रसिद्धम् पुरासंघटि-

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
बृहस्पतिं वसुमना, यथा पप्रच्छ भारत ॥ २ ॥
राजा वसुमना नाम, कोशल्यो धीमतां वरः ।
महर्षिं किल पप्रच्छ, कृतप्रज्ञं बृहस्पतिम् ॥ ३ ॥
सर्व्वं वैनयिकं कृत्वा, विनयज्ञो बृहस्पतिम् ।
दक्षिणानन्तरो भूत्वा, प्रणम्य विधिपूर्व्वकम् ॥ ४ ॥
विधिं पप्रच्छ राज्यस्य, सर्व्वलोकहिते रतः ।
प्रजानां सुखमन्विच्छन्, धर्म्मशीलं बृहस्पतिम् ॥ ५ ॥

वसुमना उवाच ।

केन भूतानि वर्द्धन्ते, क्षयं गच्छन्ति केन वा ।
कमर्च्चन्तो महाप्राज्ञ, सुखमव्ययमाप्नुयुः ॥ ६ ॥
एवं पृष्टो महाप्राज्ञः कोशल्येनामितौजसा ।
राजसत्कारमव्यग्रं, शशंसास्मै बृहस्पतिः ॥ ७ ॥

बृहस्पतिरुवाच ।

राजमूलो महाप्राज्ञ, धर्म्मो लोकस्य लक्ष्यते ।
प्रजा राजभयादेव न खादन्ति परस्परम् ॥ ८ ॥
राजा ह्येवाखिलं लोकं, समुदीर्णं समुत्सुकम् ।
प्रसादयति धर्म्मेण, प्रसाद्य च विराजते ॥ ९ ॥
यथा ह्यनुदये राजन्, भूतानि शशिसूर्य्ययोः ।
अन्धे तमसि मज्जेयुरपश्यन्तः परस्परम् ॥ १० ॥
यथा ह्यनुदके मत्स्या, निराक्रन्दे विहङ्गमाः ।
विहरेयुर्यथाकामं, विहिंसन्तः पुनः पुनः ॥ ११ ॥

तम् वृत्तमाश्रित्य काचित् वार्त्ता ताम् । बृहस्पतिम् = बृहतां वाचां पतिस्तम्, देवगुरुम्, १–२ ॥ कौशल्यः—कोशलदेश-सम्भूतः । सर्व्वं......कृत्वा = (अभ्युत्थान-अभिवादनादिकं समयं शिष्टाचारं विधाय । दक्षिणा......भूत्वा, दक्षिणातः—अनन्तरः समीपे भूत्वा प्रदक्षिणीकृत्य इत्यर्थः ३–४ । अव्ययम्—अविनश्वरम् । ६ । राजसत्कारः = नृपस्य आदरः सम्भावना इति यावत् । ७ । समुदीर्णम्—त्यक्तमर्य्यादम्, समुत्सुकम्—परदारादिषु आसक्तम् ; प्रसादयति—दण्डेन शोधयति । ९ ।

विमर्य्यातिक्रमेरंश्च, विप्रसह्यापि परस्परम् ।
अभावमचिरेणैव, गच्छेयुर्नात्र संशयः ॥ १२ ॥
एवमेव विना राज्ञा, विनश्येयुरिमाः प्रजाः ।
अन्धे तमसि मज्जेयुरगोपाः पशवो यथा ॥ १३ ॥
हरेयुर्बलवन्तोऽपि, दुर्बलानां परिग्रहान् ।
हन्युर्व्यायच्छमानांश्च, यदि राजा न पालयेत् ॥ १४ ॥
ममेदमिति लोकेऽस्मिन् भवेत् सम्परिग्रहः ।
न दारा न च पुत्रः स्या, न धनं न परिग्रहः ।
विष्वग्लोपः प्रवर्त्तेत, यदि राजा न पालयेत् ॥ १५ ॥
यानं वस्त्रमलङ्कारान्, रत्नानि विविधानि च ।
हरेयुः सहसा पापा, यदि राजा न पालयेत् ॥ १६ ॥
पतेद्बहुविधं शस्त्रं, बहुधा धर्म्मचारिषु ।
अधर्म्मः प्रगृहीतः स्यात् यदि राजा न पालयेत् ॥ १७ ॥
मातरं पितरं वृद्ध, माचार्य्यमतिथिं गुरुम् ।
क्लिश्नीयुरपि हिंस्युर्वा, यदि राजा न पालयेत् ॥ १८ ॥
वधबन्धपरिक्लेशो, नित्यमर्थवतां भवेत् ।
ममत्वं च न विन्देयु, र्यदि राजा न पालयेत् ॥ १९ ॥
अन्ताश्चाकाल एव,' स्युर्लोकोऽयं दस्युसाद्भवेत् ।
पतेयुर्नरकं घोरं, यदि राजा न पालयेत् ॥ २० ॥
न योनिदोषो वर्त्तेत, न कृषिर्न वणिक्पथः ।
मज्जेद्धर्म्मस्त्रयी न स्याद्, यदि राजा न पालयेत् ॥ २१ ॥
न यज्ञाः सम्प्रवर्त्तेयु, र्विधिवत् स्वाप्तदक्षिणाः ।
न विवाहाः समाजो वा, यदि राजा न पालयेत् ॥ २२ ॥

अनुदके-अल्पोदके, निराक्रन्दे-हिंस्रमयरक्षिते ; । ११ । अगोपाः-रक्षकहीनाः,-परिग्रहान्-"ग्रहादीन्" ; व्यायच्छमानाम्-(स्वं स्वं अर्थमादाय रक्षमाणाम् । १३-१४ ॥ सम्परिग्रहः-सम्यक् परितो ग्रहणम् ; विष्वग्...प्रवर्त्तेत-ममेदं न स्यात् अपितु बलवत इदमित्येव, विष्वक् सर्वतः अर्थानाम् लोपः लुण्ठनम्-आरभेत । १५ । ममत्वम्-ममेदं ममेदं इति एवं रूपमभिनिवेशम् ; अन्ताः मत्यवः । दस्युसात्-चौराधीनः । १६ । २० ॥ योनिदोषः-व्यभिचारे-निन्दा, त्रयी=ऋग्यजुः-सामरूपाः वेदाः ; स्वाप्तदक्षिणाः ; सु-सुष्ठुआप्ताः लब्धाः दक्षिणाः-यज्ञकर्म्म=

न वृषाः सम्प्रवर्त्तेर, न मध्येरंश्च गर्गराः ।
घोषाः प्रणाशं गच्छेयुर्यदि राजा न पालयेत् ॥ २३ ॥
त्रस्तमुद्विग्नहृदयं, हाहाभूतमचेतनम् ।
क्षणेन विनशेत् सर्व्वं, यदि राजा न पालयेत् ॥ २४ ॥
न संवत्सरसत्राणि, तिष्ठेयुरकुतोभयाः ।
विधिवद्दक्षिणावन्ति, यदि राजा न पालयेत् ॥ २५ ॥
ब्राह्मणाश्चतुरो वेदान्नाधीयीरंस्तपस्विनः ।
विद्यास्नाता व्रतस्नाता, यदि राजा न पालयेत् ॥ २६ ॥
न लभेद्धर्म्मसंश्लेषं, हतविप्रहतो जनः ।
हतो स्वस्येन्द्रियो गच्छेद्, यदि राजा न पालयेत् ॥ २७ ॥
हस्ताद्धस्तं परिमुषेद्भिद्येरन् सर्व्वसेतवः ।
भयार्त्ते विद्रवेत् सर्व्वं, यदि राजा न पालयेत् ॥ २८ ॥
अनयाः सम्प्रवर्त्तेरन्, भवेद्वै वर्णसङ्करः ।
दुर्भिक्षमाविशेद्राष्ट्रं, यदि राजा न पालयेत् ॥ २९ ॥
विवृत्य हि यथाकामं, गृहद्वाराणि शेरते ।
मनुष्या रक्षिता राज्ञा, समन्तादकुतोभयाः ॥ ३० ॥
नाक्रुष्टं सहते कश्चित्, कुतो वा हस्तलाघवम्

सम्पादनात् लब्धव्यधनानि यासु ताः ॥ २१–२२ ॥ सम्प्रवर्त्तेरन्–'रेतः सिञ्चेरन्,' गर्गराः–मन्थन्यः, हाहाभूतम्–"हाहाध्वनिम् कुर्व्वत्; भयार्त्तम् ॥ २३–२४ ॥ संवत्सरसत्राणि पूर्णवत्सरं व्याप्य क्रियमाणानि यागविशेषाः–" बहुभ्यो दीयते यत्र कुर्व्वन्ति प्राणिनो बहु । कर्त्तारो बहवो यत्र, सत् सत्रमित्यभिधीयते ॥' अकुतोभयाः नास्ति कुतः कस्मादपि भयं येषाम्–ते निर्भयाः । विद्यास्नाता–ये समाप्य वेदमसमाप्य व्रतानि समावर्त्तन्ते ते । व्रतस्नाताः–ये समाप्य व्रतानि असमाप्य वेदं समावर्त्तन्तेते व्रतस्नातकाः ॥२५–२६॥ लभेद्–लभेत; पदमिदमार्षम्; धर्म्मसंश्लेषं–धर्म्मालिङ्गनम्, धर्म्मस्याश्रयणम्, हतविप्रहतः–आदौ हतः-आहतः पश्चात् विप्रहतः–विशेषेण प्रकर्षेण च हतः पीड़ितः। हस्तात्......मुषेत्–हस्तात् करात् हस्तं हस्तस्थमपि द्रव्यादिकं परिमुषेत् चोरः हरेत् इति । भिद्येरन्–सेतवः–सर्व्वे नियमाः भेदं लङ्घनं गच्छेयुः । विद्रवेत्–अपसर्पेत् ॥ २७–२८ ॥ अनयाः–अनीतयः । अनायासं इति पाठे (अक्लेशं यथा स्यात् तथा प्रवर्त्तेरन्-परदारादिषु) । आविशेत् प्रविशेत्; विवृत्य–अपावृत्य ॥ २९–३० ॥ नाक्रुष्टं......लाघवम्–आक्रुष्टं गालनं हस्तलाघवम्–तत्साध्यम् ताड़नं वा कुतो न सहते, अपितु अनायत्तत्वात् सहत एव । गां–पृथिवीम् ; अपुत्रकाः–

यदि राजा न सम्यग् गां, रक्षयत्यपि धार्म्मिकः ॥ ३१ ॥
स्त्रियश्चापुरुषा मार्गं, सर्व्वालङ्कारभूषिताः ।
निर्भयाः प्रतिपद्यन्ते, यदि रक्षति भूमिपः ॥ ३२ ॥
धर्म्ममेव प्रपद्यन्ते, न हिंसन्ति परस्परम् ।
अनुगृह्णन्ति चान्योन्यं, यदा रक्षति भूमिपः ॥ ३३ ॥
यजन्ते च महायज्ञैस्त्रयो वर्णाः पृथग्विधैः ।
युक्ताश्चाधीयते विद्यां, यदा रक्षति भूमिपः ॥ ३४ ॥
वार्त्तामूलो ह्ययं लोकस्त्रय्या वै धार्य्यते सदा ।
तत्सर्व्वं वर्त्तते सम्यग्, यदा रक्षति भूमिपः ॥ ३५ ॥
यदा राजा धुरं श्रेष्ठामादाय वहति प्रजाः ।
महता बलयोगेन, तदा लोकः प्रसीदति ॥ ३६ ॥
यस्याभावेन भूताना, मभावः स्यात् समन्ततः ।
भावे च भावो नित्यं, स्यात् कस्तं न प्रतिपूजयेत् ॥ ३७ ॥
तस्य यो वहते भारं, सर्व्वलोकभयावहम् ।
तिष्ठन् प्रियहिते राज्ञ, उभौ लोकाविमौ जयेत् ॥ ३८ ॥
यस्तस्य पुरुषः पापं, मनसापि च चिन्तयेत् ।
असंशयमिह क्लिष्टः, प्रेत्यापि नरकं व्रजेत् ॥ ३९ ॥
नहि जात्ववमन्तव्यो, मनुष्य इति भूमिपः ।
महती देवता ह्येषा, नररूपेण तिष्ठति ॥ ४० ॥
कुरुते पञ्चरूपाणि, कालयुक्तानि यःसदा ।
भवत्यग्निस्तथादित्यो, मृत्युर्वैश्रवणो यमः ॥ ४१ ॥
यदा ह्यासीदतः पापान्, दहत्युग्रेण तेजसा ।
मिथ्योपचरितो राजा, तदा भवति पावकः ॥ ४२ ॥
यदा पश्यति चारेण, सर्व्वभूतानि भूमिपः ।
क्षेमं च कृत्वा व्रजति, तदा भवति भास्करः ॥ ४३ ॥

रक्षकहीना अपि; प्रतिपद्यन्ते प्राप्नुवन्ति-गच्छन्ति ॥ ३१–३२ ॥ पृथग्विधैः-विविधैः बहुप्रकारैः युक्ताः-कृतश्रमाः, विहितनियमाः ॥ ३३–३४ ॥ वार्त्तामूलः-वार्त्ता जीविका एव मूलं यस्य सः, त्रय्या=त्रायते रक्षते सर्वं त्रयी वार्त्तादिः, धुरं-भारम् ॥ ३५–३६ ॥ प्रेत्य-लोकान्तरे, जातु-कदाचित् ॥ ३८–४० ॥ वैश्रवणः-कुबेरः, आसीदतः समीपस्थान्; मिथ्योपचरितः-वञ्चितः,

असुचींश्च यदा क्रुद्धः, क्षिणोति शतशो नरान् ।
सपुत्रपौत्रान् सामात्यां स्तदा भवति सोऽन्तकः ॥ ४४ ॥
यदा त्वधार्म्मिकान् सर्व्वांस्तीक्ष्णैर्दण्डैर्नियच्छति ।
धार्म्मिकांश्चानुगृह्णाति, भवत्यथ यमस्तदा ॥ ४५ ॥
यदा तु धनधाराभिस्तर्पयत्युपकारिणः ।
आच्छिनत्ति च रत्नानि, विविधान्यपकारिणाम् ॥ ४६ ॥
श्रियं ददाति कस्मैचित्, कस्माच्चिदपकर्षति ।
तदा वैश्रवणो राजा, लोके भवति भूमिपः ॥ ४७ ॥
नास्यापवादे स्थातव्यं, दक्षेणाक्लिष्टकर्म्मणा ।
धर्म्ममाकाङ्क्षता लोकमीश्वरस्यानसूयता ॥ ४८ ॥
नहि राज्ञः प्रतीपानि, कुर्व्वन् सुखमवाप्नुयात् ।
पुत्रो भ्राता वयस्यो वा, यद्यप्यात्मसमो भवेत् ॥ ४९ ॥
कुर्य्यात् कृष्णगतिः शेषं ज्वलितोऽनिलसारथिः ।
न तु राजाभिपन्नस्य, शेषं क्वचन विद्यते ॥ ५० ॥
तस्य सर्व्वाणि रक्ष्याणि, दूरतः परिवर्ज्जयेत् ।
मृत्योरिव जुगुप्सेत, राजस्वहरणान्नरः ॥ ५१ ॥
नश्येदभिमृशन् सद्यो, मृगः कूटमिव स्पृशन् ।
आत्मस्वमिव रक्षेत, राजस्वमिह बुद्धिमान् ॥ ५२ ॥
महान्तं नरकं घोरमप्रतिष्ठमचेतनम् ।
पतन्ति चिररात्राय, राजवित्तापहारिणः ॥ ५३ ॥
राजा भोजो विराट् सम्राट् क्षत्रियो भूपतिर्नृपः ।
य एभिः स्तूयते शब्दैः, कस्तं नार्च्चितुमर्हति ॥ ५४ ॥

॥ ४१–४२ ॥ असुचीन्–दुष्टप्रकृतीन् । सामात्यान्–सपरिजनान् ॥ ४३–४४ ॥

आच्छिनत्ति–बलात् आदत्ते ॥ ४६ ॥ अक्लिष्टकर्म्मणा–नित्यं कर्म्मानुष्ठानपरेण; अनसूयता–गुणेषु दोषमनाविष्कुर्व्वता ॥ ४८ ॥ प्रतीपानि–प्रतिकूलानि, कृष्णगतिः कृष्णवर्त्मा–वह्निः; अनिलसारथिः,–वायुसहायकः; राजाभिपन्नस्य–नृपेण उपद्रुतस्य ॥ ४९–५० ॥ जुगुप्सेत–निन्द्यत्वेन वर्ज्जयेत्; रक्ष्याणि रक्षणीयानि रक्षणीयानि द्रव्याणि वा ॥ ५१–५२ ॥ अप्रतिष्ठम्–आस्पदरहितम्; चिररात्राय–चिरम्, राजा–"प्रजारञ्जकः, भोजः–सुखानां भोजयिता, विराट्–विविधं राजते, श्रीमान्; सम्राट् राज्ञामपि राजा; इति अकुण्ठितैश्वर्य्यः" ॥ ५३–५४ ॥ बुभूषुः–भवितु

तस्मादृबुभूषुर्नियतो, जितात्मा नियतेन्द्रियः ।
मेधावी स्मृतिमान् दक्षः, संश्रयेत महीपतिम् ॥ ५५ ॥
कृतज्ञं प्राज्ञमक्षुद्रं, दृढभक्तिं जितेन्द्रियम् ।
धर्म्मनित्यं स्थितं नीत्यां, मन्त्रिणं पूजयेन्नृपः ॥ ५६ ॥
दृढभक्तिं कृतप्रज्ञं, धर्म्मज्ञं संयतेन्द्रियम् ।
शूरमक्षुद्रकर्म्माणं, निषिद्धजनमाश्रयेत् ॥ ५७ ॥
प्रज्ञा प्रगल्भं कुरुते मनुष्यं, राजा कृशं वै कुरुते मनुष्यम् ।
राज्ञाभिपन्नस्य कुतः सुखानि, राज्ञाभ्युपेतं सुखिनं करोति ॥ ५८ ॥
राजा प्रजानां हृदयं गरीयो, गतिः प्रतिष्ठा सुखमुत्तमं च ।
समाश्रिता लोकमिमं परञ्च जयन्ति सम्यक् पुरुषा नरेन्द्रं ॥ ५९ ॥
नराधिपश्चाप्यनुशिष्य मेदिनीं, दमेन-सत्येन च सौहृदेन च ।
महद्भिरिष्ट्वा क्रतुभिर्म्महायशास्त्रिविष्टपे स्थानमुपैति शाश्वतम् ॥ ६० ॥
स एव मुक्तोऽङ्गिरसा, कौसल्यो राजसत्तमः ।
प्रयत्नात् कृतवान् वीरः प्रजानां परिपालनम् ॥ ६१ ॥

इति चाङ्गिरसवाक्ये षष्टषष्टितमोऽध्यायः ।

स्वस्तिवादः ।

माननीयवर्द्धमानाधिपति–श्री श्रील विजयचाद
महताब् बाहादुर, के, सि, एस्, आइ ; के, सि, आइ, इ ;
आइ, श्रो, एम्–महोदयस्य "ढाका" ऽगमनानन्तरं
विरचिताः श्लोकाः

लक्ष्मीर्यस्य जयश्रियं वितनुते नित्यं प्रजासु स्वयं
वाणी वङ्गमयी वधेव रमणी यं सेवते कण्ठगा ।
सोऽयं वाच-महीपतिरतितरां श्रीवर्द्धमानाधिपः
स्त्रीपुत्रैर्विजयश्चिरं विजयतां राजाधिराजोमहान् ॥ (१)

बिभक्षुः,-भ्यातुमिच्छुः, अक्षुद्रम्-महात्मानम् ॥ ५५–५६ ॥ निषिद्धजनम्–अधमेकः एवेदं कार्य्यं करिष्ये, किमेतैः इति वादिनम् एकाकूवीरम्, कृशम्–दुर्ब्बलम् ॥ ५७–५८ ॥ गरीयः–महत्तरम् । अनुशिष्य–शासनं कृत्वा, त्रिविष्टपे स्वर्गे, शाश्वतम्–नित्यम् ॥ ॥ ६० ॥

विद्याशीलयशोधनानि पटुता संसत्सु सम्माननाविद्यन्ते नितरामनन्यसदृशे राजाधिराजे त्वयि ।
दिष्ट्या त्वाऽद्य निरीक्ष्य हृद्यवपुषं गायन्ति सर्वे जनाः—
जीव्याद् भोः सुचिरं भवान् भगवतः कारुण्यतः स्वास्थ्यतः ॥ (२)

भूपेन्दुर्महताद् महानुभवतादाक्षिण्यदानैर्गुणैः
पूर्व्वान् वः पुरुषान् यथा विजितवांस्तातोऽपि ते तं तथा ।
पुत्रो यद्यपि दत्तकस्त्वमसि भो एतद्धि मोदप्रदं—
तातं तं च पितामहं निजगुणैराच्छाद्य सवत्संसे ॥ (३)

शुभकर्म्मप्रवाहेण प्रीणयन् पत्तनान्तरम् ।
पुण्यो नव इव त्वं हि ढाकामद्य समागतः ॥ (४)

कश्चित्त्वाऽत्र कियत् कालं भूयोऽन्यत्र गमिष्यति ।
तथाप्यत्र विराजेते सर्व्वेनो विमलं यशः ॥ (५)

वङ्गानां मङ्गलायाद्य वङ्गशासनसंसदि ।
राज्ञाऽपि स्वीकृतं कर्म्म त्वयातिश्रान्तिकारणम् ॥ (६)

शिक्षायां शासने चैव वङ्गानां भूतये तथा ।
विनियुक्तस्त्वया कालः सर्व्व एव महात्मना ॥ (७)

सौभाग्यं महदद्य हृद्यचरित ! त्वद्दर्शनादत्र नो
मान्यस्त्वं महनीयकीर्त्तिरतुलः प्रख्यातवंशोद्भवः ।
वङ्गानामुपकारकः प्रियतमः कान्त्या हि चन्द्रोपमः
स्तोपुच्चैर्विजय शिवरं विजयतां राजाधिराजो महान् ॥ (८)

रघुनाथशिरोमणिः ।

अस्ति वङ्गेषु नवद्वीपाभिधानं पण्डितप्रधानं किमपि मनोहरं नगरम् । तत्रावसत् काचिद् दीना पतिहीना ब्राह्मणी । तस्या एक एव सूनुरभवद् 'रघुनाथोनाम' । सा किल ब्राह्मणरमणी नवद्वीपतिलकं वासुदेवं परिचरन्ती कथं कथमपि पुत्रेण सह जीविकामतिवाहयति स्म ।

मानवानां भविष्यज्जीवनलक्ष्म परिलक्ष्यते खलु बाल्ये एव । प्रातरेव दिनं सूचयति । यः किल विहङ्गमः काले सुदूरमाकाशमार्गे परियास्यति तस्य तु शैशव-एव वीक्ष्यते कुशलता पक्षचालनादिषु । रघुनाथस्यापि प्रतिभा बाल्यादेव दिगन्त-

विश्रुता जाता। पञ्चमे वयसि स नवद्वीपमधिवसतोरवासुदेवसार्व्वभौमस्य संस्कृत-विद्यालये प्रेरितोऽभूत्। एकदा ताम्रकुटसेवनार्थमध्यापकेन वह्न्यानयनायसन्दिष्टः पञ्चमवर्षदेशीयोऽसौ बालकः अध्यापकपत्नीमग्निं ययाचे। ततो यावत् सा उपाध्यायी महानसं प्रविश्य चुल्लिकातः ज्वलन्तमुल्मुकमुत्तोल्य प्रदातुमुद्यता तावत् स तीक्ष्णधीर्बालकः किमपि तत्र भोजनान्तरमपश्यन् तरसा भूमितः कियद्धूलिराशिं पाणौ कृत्वा तदुपरि तं प्रज्वलितमग्निं अध्यापकं प्रापयामास। शिष्यस्यैतादृक् प्रत्युत्पन्नमतित्वं पर्य्यवेक्ष्य वासुदेवोनितरां हृष्टः संजातः प्राकाशयच्च "कालेनायं रघुनाथः अद्वितीयः कश्चिन्मनीषी भविष्यति"।

अथ स कैशोरे काव्यव्याकरणादिशास्त्रेषु लब्धप्रवेशः न्यायदर्शनाध्ययनाय मिथिलापुरीमगमत्। तदानीं केवला मिथिलैवासीद् न्यायशास्त्राध्ययनस्यैकमात्रं स्थानम्। अत्रैवहि मिथिलायां अशेषशास्त्रानुशीलनतत्परः क्षत्रियवरो राजा जनकः प्रत्युवास। प्राचीनेयं मिथिलानगरी चिरादेव शास्त्रालोचनाधिष्ठानमासीत्। रघुनाथस्तु तत्र पण्डितप्रवरात् पक्षधरमिश्रात् स्वल्पेनैव कालेन समग्रं न्यायशास्त्रमधीत्य शास्त्रेषु महोत्कर्षं धियः प्रादर्शयत्। तस्यासाधारणमभिनिवेशमभिलक्ष्य सर्व्वे तस्य सहाध्यायिनः अपरे च तत्रत्या बहवः पण्डिता विस्मयमापुः। दिग्विजयी स क्षणजन्मा रघुनाथः क्रमेण शास्त्रवादैः स्वकीयमध्यापकं पक्षधरमपि पराजित्य विमलां कीर्त्तिं लेभे।

न्यायशास्त्रे अधीती स मिथिलाधीतान् ग्रन्थान् स्वहस्तेन लिखित्वा अनुलिपिभिः सह स्वदेशं प्रत्यागन्तुं गुरोरनुज्ञां प्रार्थयामास। गुरुणां तु तस्य प्रत्यागमनमेव केवलमनुमोदितं नतु लिखितग्रन्थानयनम्। तेनोक्तम् "वत्स। देशान्तरादागतेभ्योग्रन्थप्रदानं नास्मद्देशीया रीतिः। तद् विरमेतादृशात् सङ्कल्पात्"। "शिरोधार्य्यं भवतु गुरोर्वचः" इति सम्प्रधार्य्य रघुनाथः कियता कालेन सर्व्वानेव तान् न्यायग्रन्थान् कण्ठगतान् कृत्वा स्वधाम नवद्वीपमुपतस्थे। अहो महिमा खलु मेधाशक्तेः? या किल वङ्गभूमिरेकदा न्यायवादविवर्जितासीत् सैव वङ्गभूमिरिदानीं रघुनाथप्रसादतः न्यायवार्त्तामुखरिता जाता। जन्मनायं तीक्ष्णधीरघुनाथो न केवलं नवद्वीपस्य अपि तु समग्राया वङ्गभूमेरेव मुखमुज्ज्वलं कृतवान्।

स्वदेशं प्रत्यावृत्य स तानि तानि कण्ठगतानि शास्त्राणि सर्व्वाण्येव ग्रन्थाकारेण विरचय्य सर्व्वतः प्राचारयत्। तान्यधीत्य वङ्गवासिनः सर्व्वे बुधाः परं विस्मयं भेजुः। तेषां ग्रन्थानां टीकाव्याख्यादिकं प्रणीयापि बहवः पण्डिता अम-

रतां गताः । इदानीन्तना अपि संस्कृताध्यायिनः रघुनाथविरचितान् ग्रन्थान् प्रायः पठन्ति । तस्य तावत् प्रगाढ़पाण्डित्येन विमुग्धाः अपरे केचिद् वङ्गदेशीया विपश्चितः कस्मिंश्चिद् राजसदसि सम्भूय तं "शिरोमणि" रित्युपाधिना भूषयामासुः । अस्यत्र प्रचारिता रघुनाथविषयिणी काचिच्चित्ताहारिणी किंवदन्ती । स एकदा शरैरिव तीक्ष्णैः शास्त्रतर्कैः संयुध्य अपरान् पण्डितराजान् विजेतुमना विदेशमगच्छत् । तत्रत्याः पण्डितम्मन्या मनीषिणः तमेकचक्षुषं * रघुनाथं अविज्ञायैव तस्य प्रखरां प्रज्ञां सोपहासमूचुः—

"आखण्डलः सहस्राक्षोमहेशानस्त्रिलोचनः । अन्ये द्विलोचनाः सर्व्वे कोभवानेकलोचनः ?" ततश्च स प्रत्युत्पन्नमतित्वप्रभावेन तत्क्षणादेव श्लोकमेकं रचयित्वा सगर्व्वमिदं प्रत्यवादीत्—

"कुशद्वीप—महाद्वीप—नवद्वीपनिवासिनः ।
तर्कसिद्धान्त-सिद्धान्त-शिरोमणिमनीषिणः" ॥

एतदेवात्र गौरवकारणं यत् स तत्र सर्व्वानेव तान् पण्डिताभिमानिनो बुधान् पराजित्य परां प्रशंसामवाप ।

वसन्तवर्णनम् ।

कुर्वन् रसालविटपं बहुमञ्जरीकम् ।
यूनां प्रमोदमखिलं वितरन् वसन्तः ॥
कन्दर्पदर्पमतुलं विदधन् मनोज्ञः ।
आलोलयन् पिककुलं समयः समेतः ॥ १ ॥
आघ्राय सौरभमसौ वकुलावलीनाम्
आप्लाय फुल्लकमले वनभू—तडागे ।
आमृश्य वारि रतिजं ललनाललाटे
आक्रीड्य बाललतया सह वाति वातः ॥ २ ॥
आम्रे तरौ स्थितवतां मधुरस्वराणाम्
कीरालिभृङ्गपिककादिकपक्षिकाणाम् ।
शृण्वन्ति ये विरवणं शमिनो वनस्थाः
उत्कण्ठितानि हृदयानि भवन्ति तेषाम् ॥ ३ ॥

---

* रघुनाथस्तु एकेन चक्षुषा काण आसीत् ।

पान्थाः पलाशविटपिस्थितपुष्पराजिम्
त्यक्तप्रिया रतिपतेः शरशातनाय ।
सूर्य्यप्रभापटलकान्तिसमानवर्णाम्
ज्वालावलीढमुदितामनलं विजज्ञुः ॥ ४ ॥

युवतयः सदया वनपुष्पकं विदधति श्रुतिभूषणभूषकम् ।
मधुकरा मधुपानकलोलुपाः वकुलसूनदलं दलयन्ति च ॥ ५ ॥
कुसुमिते सहकारवने पिकाः कलकलं कलयन्ति मनोहरम् ।
मधुकरध्वनिजातमनोज्ञया दयितया न तथा प्रशमोदधे ॥ ६ ॥
रसालवल्यां भ्रमराः प्रियाभिः सार्द्धं स्वदन्ते मधु मञ्जरीणाम् ।
विलासिनां सम्मदसंप्रवाहाः कूजन्ति कुञ्जे मधुरं पिकाश्च ॥ ७ ॥
मधुकरो निजवल्लभया समं पिबति भूरि रसालरसं मुदा ।
युवतयोऽपि शिरीषसुमं श्रुतौ निदधते सततं स्मरसायकम् ॥ ८ ॥

श्रीहरिः ।

षट्पदीविवरणम् ।

विवरणपंचांगनिर्णयाभिधव्याख्यासमलंकृतम् ।

२ य वर्षस्य १ म खण्डस्य ३५ पृष्ठतोऽनुवृत्तम् ।

अथ "शान्तो दान्त उपरत स्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्" इत्यादिश्रुत्युक्तं पौर्वापर्य्यमुपरतितितिक्षाभ्यां समाधेराविष्करोति, ततास्त्वित्यादिना ।

षट्पदीविवरणम्—ततस्तु गुर्वागमदर्शिते पथि
प्रसह्य चेतो विनियोक्तुमर्हति ।
गतान्तरायस्य महत्यपि क्रिया
फलत्यवश्यं, न च तत्र संशयः ॥ ३९ ॥

ततः, पूर्वोपदर्शितरूपयोरुपरतितितिक्षयोर्निष्पन्नयोः सतोः, तुरवधारणे, गुर्वागमदर्शिते, गुरवश्चागमाश्च तैर्विवक्षिते, यद्वा गुरुभिरागमेभ्यो निष्कृष्य प्रदर्शिते, अत्र लिखितपाठादितः स्वयं श्रौतार्थग्रहणं मा प्रसांक्षीदित्याशयेन गुरुग्रहणम् । आगमग्रहणं च कृतसंन्यासानामपि त्रैवर्णिकानामिव श्रवणनियमो

यथा स्यादित्येतदर्थम्, तेन श्रोतव्यः श्रुतिवाक्येभ्य इति श्रौतनियमोऽप्युपपन्नो भवतीति भंग्या श्रवणमेवोक्तम्। यच्च, ध्येयाख्यानि द्रष्टव्यवस्तूनीति यावत्। पर्य्यवहणं च मनननिष्पत्तिलाभार्थम्, तल्लाभश्च "हठात्" इत्यर्थकेन प्रसह्येतिपदेन सहोपसन्धानात्; अन्यथाऽन्तरेण मननं श्रवणमात्रेणार्थदार्ढ्याभावेन प्रयाससाध्ये समाधौ हठात् प्रवृत्तिरनवकल्पनात्। शाब्दमतौ प्रामाण्यसंदेहेऽर्थसंदेहध्रौव्येण निर्विचिकित्सवस्तुसिद्धिनिबन्धनायाः श्रद्धाया असम्भवात्समाधिसाधनानुष्ठानायोगादितिभावः। यद्यपि श्रवणोऽधिकारप्रयोजकतयोपक्रान्तेषु समाधानस्य पाठात् तदुपकार्य्यस्य श्रवणस्य तदनन्तरं सावकाशस्य मननस्य वा ततः पूर्व्वं कुतः सम्भवः? न च जन्मान्तरे कृतश्रवणमननानामिहजन्मनि समाधिसम्भवाभिप्रायेण संगमनीयमितिवाच्यम्। तथा सति श्रवणांगतया समाधेरपि जन्मान्तरेऽप्यावश्यकत्वेन तत्रोक्तानुयोगतादवस्थ्यात्। जन्मान्तरीयसमाधिश्रवणमननादिधाराकल्पनेचानवस्थादोषप्रसंगात्। तथापि श्रोतव्यः श्रुतिवाक्येभ्य इति बहुत्वलिंगात्तस्यमस्यादिवाक्यैर्बहुत्व उपदेशदर्शनाच्च श्रवणाद्यभ्यासस्यावश्याभ्युपगन्तव्यतया क्रमिकश्रवणसमाधानादि सांगोपायस्तोमाभ्याससम्भवेन पूर्वपूर्वश्रवणादिव्यक्त्याहितोत्कर्षस्य समनन्तरसमाधिव्यक्तिसन्तानस्य सुसम्पादनीयत्वात्। वस्तुतस्तु विचारपर्य्यन्तस्य श्रवणव्यक्तिविशेषस्यैव ब्रह्मावगतिफलं प्रत्ययोगव्यवच्छेदेन हेतुत्वात्तदंगभूतसमाधेर्गुणागमप्राप्तप्रकारगोचरतायाः सम्भवात्तदभिप्रायेणैतद्ग्रन्थसमन्वयनिर्वाहात्। एतेनाभ्यासाभ्युपगमपक्षे पूर्वपूर्वश्रवणोपकृतसमाधिवशेनोत्तरोत्तरश्रवणनिर्वाहसम्भवेऽपि प्राथमिकश्रवणात्पूर्वं समाधाने श्रवणाद्युपकारोपपादनासम्भवो दुरुद्धर एवेति समाहितम्। विचारपर्य्यन्तप्रवृत्तश्रवणव्यक्तिविशेष एव समाधिसापेक्षतया व्यवस्थापनात्। किंच बाल्यंच पाण्डित्यं च निर्विद्य अथ मौनीत्यादिश्रुतिस्वरससिद्धक्रमस्य श्रोतव्यो मन्तव्य इत्यादि तदेकवाक्यतापन्नश्रुत्यन्तरेष्वप्यवर्जनीयतयाऽनुयाजादिन्यायेन समाधेः श्रवणं प्रत्युत्तरांगत्वौचित्येन तत एव दर्शितानुयोगस्यानुत्थानात्। अतएव च कृतश्रवणानामपि मनननिदिध्यासनवैकल्येनापरोक्षदर्शनरूपफलानुत्पादः "शृण्वन्तोऽपि बहवो यं न विदु" रित्यादिश्रुत्युक्तः संगच्छते, इतरथा श्रवणस्य यावदपेक्षितोत्पत्तिकस्यापरायत्तफलोदयस्य कदाचिदप्यतोक्तिरपार्थिकैव प्रसज्येतेति। वयं तु स्वाध्यायाध्ययनविधिनैव सांगोपांगनिखिलवेदाध्ययनप्राप्त्या तद्बलेन समाधानसिद्धिरप्रत्यूहा, गुरुपूर्वकवेदार्थानुसन्धा-

नस्याध्ययनफलत्वात्, तथाच कुतोऽस्य चोद्यस्यावकाशः? प्रकृते गुर्वागमदर्शितेे पथीत्यनेनाध्ययनजनितज्ञानमात्रस्यैव समाधानहेतुत्वबोधनात्तत एव च त्रैवर्णिकाधिकारनियमस्यापि सूपपादत्वादिति युक्तमुत्पश्यामः ।

चेतो मनः, विनियोक्तुमर्हति निवेशयितुमीष्टे, निवेशनं चात्र धारणाध्यानसमाधिसाधारणोऽवश्यमाणैकायतालक्षणो विषयविषयिभावविशेषः । इदमेव चार्थजातमर्थान्तरन्यासोपन्यासेन समर्थयति गतान्तरायस्येति । गता अपनीता अन्तराया विक्षेपादिरूपाः प्रत्यूहा यस्य तादृशस्य प्रमातुः । हेतुगर्भविशेषणमिदम् । महत्यपि गुरुतरसम्भारेऽपि बहुव्ययसापेक्षसाधनसम्पादनाऽपीति यावत् । क्रिया कर्म, अवश्यम् नियमतः अनुष्ठानाव्यवधानेन, फलति फलाय कल्पते । सत्र आरम्भनियतफलभावे, न च संशयः, नैव संशयोभूदित्यर्थः । एतदुक्तम्भवति, रजस्तमोभ्यामभिभूतं हि चित्तसत्त्वं विक्षेपभूयस्त्वविचिकित्साप्रमादादिदोषकलुषिततया नितान्तमक्षममेकायतामम्पत्तावात्मनः । शमाद्युपरमान्तेन तु क्रियाकलापेन क्रमशोऽपचितेषु दोषेषु निरवद्यमर्य्यादया श्रवणादिपर्य्यायावाप्तस्थैर्य्यया भवितव्यमवश्यमेकायतया । सत्त्वस्य प्रकाशशरीरस्य स्थिति-* गतिकारणापसारणे निरंकुशप्रमेयावगमप्रवणतौचित्यादिति हृदयम् ॥ ३९ ॥

तदेवं पौर्वापर्य्यनिरूपणमुखेन चेतोविनियोगसुविधेयतासम्भवोऽभिहितः । इदानीं स तादृशो दुरधिगमोऽर्थो, यत्र गुर्वागमावेव प्रतिपत्तिकारणम् यत्र चेतोविनियोक्तव्यमित्युपदर्शयिष्यन् विनियोगस्य संज्ञां फलं चावेदयते, सदेकतेत्यादिना—

षट्पदीविवरणम्—सदेकतानन्दचिदन्वयाढ्याऽ—

नृनः प्रपंचस्तु जडः प्रमाथी ।

विवेक्तुमेवं प्रथमं यथावत्

पथाऽमुना साधयतात् समाधिम् ॥ ४० ॥

सतः पारमार्थिकस्य वस्तुनः, एकता अद्वैतम्, एतेन द्वैतधीनिबन्धनस्य बन्धनस्यापारमार्थिकत्वं ध्वनितम् ।

नन्वद्वैते पुरुषार्थभावो दुरुपपादः, सुखतद्भासनयोर्वस्तुमतोरसम्भवादत आह—आनन्दचिदन्वयाढ्येति । आनन्दस्य चितश्चैतन्यस्य च अन्वयाढ्या तादात्म्यवती, तेन गौतमीयगुणपरिभाषासमवायाभ्युपगमो नादर्त्तव्य इति सूचितम् । यथा चानन्दचैतन्ययोरात्मभूतयोरपि नापुरुषार्थत्वं तथोपवर्णयिष्यते कैवल्यप्रकरणे ।

* अत्र स्थितिस्तमोगुणकृता नियमः ।

स्यादेतत्, प्रत्यक्षादिप्रमाणसिद्धे हि द्वैते, कथमद्वैतं सम्भवदुक्तिकम् ? प्रत्यक्षादिप्रमाणबाधिततया तस्य शशविषाणायमानत्वात् । इतरथा शशविषाणस्यापि सिद्धेरित्याशंक्याह—अनृतदृति, नास्ति ऋतं सत्यं त्रिकालाबाध्यं वस्तु यस्मिन् तादृशः । प्रपंचः संसारः, प्रपंचति अव्यवस्थया विपरिणमते, प्रपंचयति भोक्तॄन् निरवधिकासंख्येययोनिवृन्दावचमध्यमप्रभेदेन सन्तन्यमानैर्भोग्यभोगायतनभोगोपकरणग्रामैर्विस्तारयति वेति व्युत्पत्तेः । तथाच वास्तवसत्तारहितः संसार इत्यर्थः । अयमाशयः । माभूत् प्रत्यक्षेण बाधो द्वैतमात्रस्य, आगमेनानुमानेन च तद्बाधो दुरपह्नवः । तथाहि सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्, अथात आदेशो नेति नेति, नह्यस्मात्परमस्तीत्यादयोनिरुपप्लवा आगमा अशेषस्य प्रपंचस्य बाधं समर्थयन्तोऽद्वितीयसदात्मावधारणाय प्रभवन्तीति नापह्नोतुमर्हम् । यद्यपि कासुचित् श्रुतिषु द्वैतस्यापि निर्देशोऽविशिष्टश्चकास्तीति न निर्विचिकित्ससदद्वैतप्रतिपादनैकपरता श्रुतीनां शक्याऽवगन्तुमिति विभाव्यते, तथापि उपक्रमोपसंहारादि तात्पर्य्यग्राहकप्रमाणोपमर्द्दपरिमृदितद्वैतप्रतिपिपादयिषाप्रत्यपेक्षकवैधुर्य्यबोधानुविधीयमानाद्वैतश्रुतिबाधाध्यवसायानुपरोधानां द्वैतश्रुतीनामतदर्थकतया अप्रत्यूहत्वादागमिकोद्वैतबाधो निराबाध एव ।*

अनुमानमपि द्वैतस्य मिथ्यात्वावधारणद्वारमद्वैतसत्तामवबोधयति । तथाहि,—विमतं स्वाश्रयत्वाभिमताबद्धावृत्ति भवितुमर्हति, दृश्यत्वात् सदन्यत्वाद्वा, शुक्तिरूप्यादिवदित्यादिकमाकरे सुव्यक्तम् । न च ज्येष्ठप्रमाणेन प्रत्यक्षेण बाधितत्वादागमानुमानयोरप्रामाण्यमिति वाच्यम् । अनपेक्षितस्य ज्येष्ठतया बाध्यतायामेवोपयुक्तत्वात् । बलवत्त्वस्यैव बाधकत्वप्रयोजकस्यानन्तरोत्पन्नत्वरूपकनिष्ठतयामेव सम्भवात् । तदुक्तम् । "पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम् । अन्योऽन्यनिरपेक्षाणां यत्र जन्म धियां भवेद्" इति । नचानुपजातविरोधितया ज्येष्ठस्य बलवत्त्वं न तूपजातविरोधिनः पाश्चात्यस्येति वाच्यम् । उपजातविरोधिताया एव बलवत्त्वनियतत्वात् । इतरथाऽनुपजातविरोधिनो बलवत्त्वे तादृशेन प्रत्यक्षेण प्रतिबद्धस्यागमज्ञानादेरुत्पादस्यैव दुर्घटत्वप्रसंगात् । नचैवमुपजीव्य

* द्वैतप्रतिपिपादयिषाविरहविशिष्टाद्वैतश्रुतिर्द्वैतार्थपरतानिश्चये प्रतिबन्धिका, अद्वैते तात्पर्य्यग्राहकस्योपक्रमादिपर्य्यालोचनस्य च द्वैतबुबोधयिषाविरहबोधकत्वात् तदबोधे चाद्वैतश्रुतिप्रतिबन्धबोधाप्रतिघातात् न द्वैतार्थबोधपरत्वनिश्चयसम्भवः । अद्वैतशाब्दबोधात्मकद्वैतबाधनिश्चये च द्वैततात्पर्य्यनिश्चयस्य द्वैतार्थशाब्दसामग्रीविधयाऽद्वैतार्थशाब्दात्मकद्वैतबाधबुद्धिप्रतिबन्धकतया प्रकृते तदभावादप्रतिबद्धः स निश्चय इत्यर्थः ॥

विरोधः शंकनीयः । प्रत्यक्षप्रामाण्यस्यागमादिविज्ञानं प्रत्यनुपजीव्यत्वात् अप्रमाणे-
नापि तदुत्पत्तिसम्भवात् । नचागमादिविज्ञानं प्रत्यक्षस्य सांव्यवहारिकं
प्रामाण्यं व्याहन्ति, येनोपजीव्यविरोधः कथंचित् शक्यापादनतां प्रतिपद्येत ।
पारमार्थिकत्वबाधनेऽपि तस्याऽनुपजीव्यत्वात् । रेखानृतात्तरादितोऽपि सत्या-
क्षरप्रतिपत्तेः सर्वजनीनत्वात् । वस्तुते चापारमार्थिकाऽरुन्धतीदर्शनवशेन सत्या-
रुन्धतीप्रतिपत्तिर्मिथ्याभूताखण्डाकारवृत्त्या सदात्मप्रकाशे दृष्टान्तभावेनो-
परिष्टात् । प्रपञ्चोहि न सन् भवितु मर्हति, दर्शितप्रमाणगणावेदितस्य
बाध्यत्वस्यानुपपत्तिप्रसंगात् । नाप्यसन्, तथासति संव्यवहारबाधितस्यासत्य-
नरशृंगादेरिव प्रपञ्चस्य प्रतिभासासम्भवप्रसंगात् । नाप्युभयरूपः, विरोधात् ।
अतस्तदुभयविलक्षणोऽनिर्वाच्योऽनृतशब्दवाच्यः प्रपञ्च आस्थेय इति दिक् ।
स्यादेतत्, प्रपंचातिरिक्ते प्रमातरि प्रमाणानुपलम्भादहंममेत्यादिप्रतीतिव्यवहा-
रयोर्देहेन्द्रियादिसंघातेष्वेवाधकृप्तेर्भोग्यभोक्त्रादिभावेन स्वभावतस्तत्तत्संस्थानभेद-
रूपसंनिवेशविशेषभाक् प्रपंच एव सर्वव्यवहारास्पदमिति विवेकप्रतियोग्यप्रसिद्धेः,
कुतोऽस्य विवेकसम्भावनेत्यत आह—जड इति । जडः संहन्यमानः, पराधीनप्रवृत्ति-
रस्वप्रकाश इति यावत् । जलति घनीभवति तेजस्वी भवति वेति व्युत्पत्तेरिति-
भावः । अयमर्थः । भवेदेवं यदि प्रपंचस्य चैतन्यं कल्पयितुं शक्येत ।
न खलु स्वतन्त्रव्यवहारप्रत्यययोरचेतनादावुपपत्तिरस्ति । न च शरीरादिभावेन
संहतस्य चैतन्यमवकल्पते, संघातमात्रस्य परप्रयुक्तिव्याप्तत्वात् । चित्
सम्बन्धाद्धि चेतनायमानः प्रपंचः कथंचित् चेष्टामश्नुवीत, न पुनः स्वाभाविकं
चैतन्यमस्याभ्युपगन्तुमर्हम् । तथा सति साहजिकरूपादिवदेव चैतन्यमपि यावद्
द्रव्यभावि साधारणं च प्रसज्येत । नहि शरीरेन्द्रियादेः स्वाभाविकं रूपादिकं
शरीरप्रणाशमन्तरेण प्रणष्टुमर्हति, न वा प्रतिनियतोपलम्भनं भवितुम् । न च
चैतन्यं यावत् शरीरभावि, मृतमूर्च्छितादावव्यापनात्, नवा साधारणम्, प्रमातृ-
विशेषनियतोपलम्भनत्वात् । इत्थं च भोगायतनादेरचैतन्यसिद्धौ भोग्यग्राम-
स्यापि सुतरामचैतन्यम् मायामात्रत्वाच्चेन्द्रजालवदन्यौपाधिकप्रवृत्तित्वात्प्रपंचा-
चैतन्यं सूपपादम् । ततश्च चेतनेनोपाधिभूतेन प्रपंचव्यतिरिक्तेन सता स्वस्माद्
युक्तोविवेकः प्रपंचस्याध्यवसातुमिति । ननु माभूत् प्रपंचश्चेतनश्चेतनोचितेषु तु
निखिलेषु व्यवहारेषु चेतनोपयुक्तेषूपयुज्यमानो नितरामवर्जनीयोपकारः कथंकारं
प्रत्याख्यायताम् ? कथं वा विवेकेन प्रहीयताम् ? नियताविविक्तमूर्त्तिकत्वा-
त्सत्ताव्यवहारास्पदत्वाच्चेत्यत आह—प्रमाथीति । प्रमथितुं शीलमस्येति व्युत्प-

स्या शोकदुःखाद्यशेषोपप्लवक्षेत्रमित्यर्थः । इदमत्राकूतम् । यद्यपि चेतनस्यानादिकर्मवासनावासितः संव्यवहारेष्वखिलेष्वर्जितसन्निधानो लोकदृष्ट्या चाशक्यविवेकतयाऽऽत्मात्मीयभावेन, ममतया च परिगृहीतत्वेन नित्यापेक्षितानुग्रहोऽयं प्रपंचो न द्रागिव विविच्य अवधारयितुं शक्यते सुतरां च प्रजिहासितुम् । तथापि गुर्वागमदर्शितसरण्या परीक्षमाणैरन्वयव्यतिरेकाभ्यामभ्यासकुशलैरवगतविवेकस्य क्लेशयोनितयाऽध्यवसितस्य प्रपंचराशेरवसितानुरागबन्धनैस्तुच्छबुद्ध्याऽवश्यं भाव्यं तत्र विरज्यद्भिरिति । एवमुक्तप्रकारेण, यथावत्, शास्त्रोक्तस्वरूपप्रमाणान्यनतिपत्य, विवेक्तुं विवेकेनाध्यवसातुम् । अमुना पथा, वक्ष्यमाणमार्गेण, प्रथमं विचारात् प्रागेव, समाधिं समाधानं, तयोर्निरुक्तरूपयोरात्मानात्मनोः स्वरूपपरिच्छेदौपयिकं साभिनिवेशं चित्तप्रणिधानविशेषम् । साधयतात् अभ्यस्येत् इत्यन्वयः । एतदुक्तं भवति, चिदात्मा किल सकलस्वतन्त्रव्यवहारास्पदीभूतः सच्चिदानन्दाद्वयलक्षणः सर्वविधपुरुषार्थावधिरनाधेयातिशयः परिपूर्णः, तद्विलक्षणश्चायमशेषकामकालुष्यशोकदुःखादिजर्जरो दृश्यकङ्कराशिरनृतेन्द्रजालकल्प इति तद्विवेकगोचरसमाधौ प्रथमतो यतितव्यम् प्रमातृभिः । तद्विवेकश्चात्यन्तं दुष्कर इत्यभ्यासभर आवश्यकः, न जातु समुदञ्चदनेकविक्रियतया परिकल्पितस्वरूपः प्रमाता स्वात्मनि पराक्रान्ततरमिमं प्रपंचं सकृत्प्रयत्नेन भेत्तुमर्हति, सपत्नशतपरिभूतप्रकृतिगणा इव राजा स्वाराज्यकामोऽमित्रवर्गे हितैषिभ्यो विवेक्तुमिति ॥ ४० ॥

इदानीं समाधेः सप्रयोजनत्वानन्तरनिरूपणीयत्वयोर्व्यवस्थापनानन्तरं निर्वचनमाह—स्वरूपशून्येवेत्यादि ।

षट्पदीविवरणम्—स्वरूपशून्येव तु चित्तवृत्तिर्ध्येयावलम्बा यदि चैकताना ।
तद्भासमुख्या निरुपप्लवा स्याद् विदुस्तदा तां च बुधाः समाधिम् ॥४१॥

ध्येयावलम्बा ध्येयवस्तुगोचरा, एकताना एकाग्रा, चित्तवृत्तिर्यदि तद्भासमुख्या सती, स्वरूपशून्येव निरुपप्लवा स्यात्तदा बुधास्तां च समाधिं विदुरिति योजना । चोऽवधारणे, अत्र च ध्येयावलम्बेत्यनेन समाधेर्धारणाध्यानपूर्वकत्वमुक्तम् । देशबन्धलक्षणकादाचित्कस्थैमरूपधारणातो विशिनष्टि, एकतानेति । ध्यानाच्चाविरलक्रमोत्पन्नस्थितिधारात्मनो व्यावर्तयति, तद्भासमुख्येति, तदेव विशदयति स्वरूपशून्येवेति, तस्य प्रतिष्ठापकत्वमाह निरुपप्लवेति, उपप्लवो विपर्ययवासनोद्बोधस्तद्रहितेत्यर्थः । अयं भावः । अभिमतविषयाकारार्पण-

लक्षणायां धारणायां सत्यां तद्गोचराविच्छिन्नप्रत्ययैकतानतालक्षणे ध्याने च निष्पन्ने तथाविधैकतानप्रत्यय एव यदा प्रकर्षगत्या चिदाभाससमुद्भासितः प्रत्येयस्वरूपमात्रावभासी न्यग्भूतवृत्तिरूपतया स्वसत्तायामुदासीन इव भवति, तदानीं साभ्यासपाटववशेनानादिभिरपि विक्षेपवासनाभिरुद्वोधसामग्री नासाद्यते, तदैव समाधिरित्युच्यते । नचैवंलक्षणश्चेत् समाधिरधिकारांगम् तदा निदिध्यासनवैयर्थ्यम्, तस्य यथोक्तसमाधिपर्यवसितत्वादिति वाच्यम् । दर्शनफलकत्वेन श्रुत्युक्तश्रवणनिष्पत्तावेव मनननिदिध्यासनयोरुपयोगांगीकारात् । पृथक् च निदिध्यासनापेक्षायां प्रमाणाभावात् । शाब्दापरोक्षवादाभ्युगमस्य स्वातन्त्र्येण निदिध्यासनादिहेतुत्वासमर्थकत्वात् । अस्माभिस्तदभ्युगममनुसृत्यैव व्याख्यातुमुपक्रान्तत्वात् । पूर्वोक्तदिशा च निखिलानुयोगपत्याख्यानसम्भवात् । उत्तरत्रापि यथाप्रकरणमुक्ताभ्युपगमस्य समर्थनीयत्वात् । युक्तं चैतत्, कथमन्यथाऽकृतप्रणिधानैर्बालैर्लिपिप्रत्यासत्तलोचनैर्लौकिकेष्वर्थविशेषेषु गुरुभिर्बहुकृत्वोऽध्याप्यमानेष्वपि यथावदीषद्गभीरं स्वरूपं नाध्यवसीयते, तत् किमंग पुनरशनायाद्यतीतसर्वोपाधिविनिर्मुक्त निर्विशेषस्वरूपावधारणे हेतुभूतं श्रवणं समाहितस्यैवात्मलाभायालमिति ॥ ४१ ॥

ध्येयावलम्बेत्युक्तम्, तत्र कतमो ध्येयः प्रकृतोपयोगीत्याह—ध्येय इति,

षट्पदीविवरणम्—ध्येयश्चिदानन्द घनः परात्मा
पूर्णः सदद्वैतवपुः पुराणः ।
विसृज्य विश्वानि च लीलया यो
नियच्छति स्वैरमथो निहन्ति ॥ ४२ ॥

चिदानन्दघनः, स्वप्रकाशसान्द्रानन्दरूपः तेन मुमुक्षुचेतोऽवधानयोग्यत्वमावेदितम् । ननु स चेदध्यात्ममेव व्यवतिष्ठते तदाऽसाधारण्यमद्वैतहानं च प्रसज्येताम् इत्यत आह—परात्मेति, अतति व्याप्नोतीत्यात्मा, परश्चासावात्मा चेति परात्मा निरतिशयमहिमत्वात्, विभुरिति यावत् । एतेन देशकालवस्तुकृतपरिच्छेदराहित्यरूपं त्रिविधमानन्त्यमाविष्कृतम् । ननु तस्यानन्दघनत्वेऽवश्यमानन्देषणया भाव्यम्, लोके प्रचुरानन्दानामपि बहुलमानन्दकामनादर्शनात् । तथाच कुतस्तदुपासनात्पुरुषार्थः सम्पत्स्यते ? अनिष्पन्नपुरुषार्थत्वात् तस्य । कथं वा कामकालुष्यादिनिर्मोक्षसम्भवः ? कामनापर्य्याकुलत्वात् । न खलु स्वयमसमर्थेनोपासकस्यार्थाः सम्पादयितुं शक्यन्ते, नवा दोषबहुलस्य सेवया कदाचिन्निर्दोषताऽपीत्यत आह—पूर्ण इति, तृप्त इत्यर्थः नित्यतृप्तो निरञ्जन इति श्रुतेः, तृप्तिश्च

स्त्रीप्रमुखेच्छावदन्यत्वम्, तेन कारुणिकस्य तस्य प्राणिसुखाभिलाषसत्त्वेऽपि न क्षतिः। स्वरूपानन्दस्य सत्यं विज्ञानमानन्दं ब्रह्मेति श्रुतिसिद्धस्य नित्याप्ततया तं प्रति कामनाऽसम्भवात् परिपूर्णत्वश्रुतेर्विषयानन्दाभिलाषस्य चानौचित्येनानुदयाद् युक्तं तद्ध्यानेन पुरुषार्थसिद्ध्याऽनुसन्धानमिति भावः।

तदेवोपपादयति—सदद्वैतेति सच्च तत् अद्वैतं चेति सदद्वैतम् तदेव वपुः शरीरं स्वरूपं यस्य तादृशः। अत्र च सत्त्वं त्रैकाल्याव्यतिरेकः। तेन स्वरूपानन्दस्यासाध्यत्वेन निवृत्त्यादिशंकाव्युच्छेदः। अद्वैतग्रहणेन च तादृशानन्दस्य स्वरूपाव्यतिरेकेण नित्याप्तत्वाद् वास्तवप्रेप्साऽविषयत्वयोग्यत्वमाविष्कृतम्। तेन नित्यतृप्तेः प्रतिपिपादयिषैव सूचिता वेदितव्या।

स्यादेतत्, अर्थक्रियाकारित्वलक्षणसत्त्वस्य क्षणिकत्वपक्ष एव क्षोदक्षमतयाऽऽनन्दाकारविज्ञानव्यक्तेरपि प्रतिक्षणमन्यथाऽन्यथात्वौचित्येन सातिशयत्वादचिरनिरुध्यमानतास्वाभाव्याच्च दुःखावश्यम्भावादुत्तरोत्तरं कामनानवलेपेन पूर्णत्ववाचोऽर्थाभाव इत्यत आह—पुराण इति। पुरातन इत्यर्थः। अयमभिप्रायः। न खलु अविभज्यमानावयवकालकलारूपक्षणनियतस्यार्थक्रियाकारित्वं शक्यमुत्प्रेक्षितुमपि, कारणतायां नियतपूर्वसत्तारूपतया पूर्वापरकालद्वयसम्बन्धाविनाभूतत्वात्। नहि पूर्वापरक्षणयोः सम्बन्धानुपरक्त्यापेक्षा नाम। तस्याः क्षणद्वयसम्बन्धसव्यपेक्षत्वात्। नैरपेक्ष्ये वा कार्य्यमिति कारणमिति च व्यवस्थाऽपि। न वा तद्व्यवस्थानुपगमेऽर्थक्रियाकारित्वं निर्वोढुं शक्यते। निरन्वयकार्य्योत्पादविनाशयोः सकलप्रमाणागोचरतयाऽभ्युपगन्तुमशक्यत्वादभ्युपगमे वा तयोः कार्य्यकारणसातत्यालीकतयोरन्यतरस्यैव पर्य्यवसानापत्त्याऽभिमतसिद्ध्ययोगात्। तथा चाधिगतानेकक्षणसम्बन्धतारूपपुराणतैवार्थक्रियायां व्यवतिष्ठत इत्यकामेनाप्यभ्युपेयम्। तेनानादिव्यवहारव्यवस्थार्थमनादिकारणसिद्धौ "तावत्कालं स्थिरं चेनं कः पश्चान्नाशयिष्यति" इतिन्यायेन दर्शितक्षणिकव्यावृत्तयोक्तसत्त्वसिद्धिरप्रत्यूहेति बोध्यम्।

श्रुतिस्मृत्यादिप्रसिद्धस्वरूपमभिधाय तत्र न्यायमवतारयितुं तटस्थलक्षणमाह—विसृज त्यद्वैन, योऽसौ परात्मा लीलया विश्वानि विसृज्य बिभ्रद्यच्छति, नियतदेशकालस्वभावप्रयोजनतया व्यवस्थापयति स्वैरं निहन्ति च इति योजना। अत्र य इत्येकवचनोपादानेन मायागुणभेदोपाधिककार्य्यभेदलब्धमूर्तिप्रविभागानां ब्रह्मविष्णुरुद्राणां परमार्थतोऽव्यतिरेकः प्रदर्शितः। लीलाग्रहणं च परिपूर्णात्मनः प्रयोजनानुपपत्त्या प्रवृत्तिकथंतापरिहारार्थम्। तथाहि प्रयो-

जनानुपलब्धौ मन्दस्यापि स्वल्पापि प्रवृत्तिर्नोपपद्यते, किं पुनर्बह्वायाससाध्येऽर्थे प्रेक्षावत्प्रवृत्तिः। प्रयोजनानुसन्धाने च पूर्णकामत्वादिश्रुतिस्मृतिव्याकोपः, योऽपि स्वभाव एवैषः स तादृशो येन नियतं सिसृक्षा लोकाध्यक्षस्येत्याचक्षीत, सोऽपि सर्गप्रलयगोचरविरुद्धस्वभावयोरनियमप्रसंगेन प्रतिवक्तव्यः, नच करुणयैव परमकारुणिकस्य भगवतः सिसृक्षेति वाच्यम्। तथा सति सुखभाज एवाखिलान् सृजेत् न पुनर्विषमविपाककर्मभुज इत्यापद्येत। किंच करुणापक्षेऽनारम्भणमेव ज्यायः प्रसज्यते, बह्वायासनिर्वर्त्तनीयप्राणिदुःखापत्तयस्य जन्माद्यनारम्भमात्र सुसम्पादनतायां तदुपेक्षायाः प्रेक्षावत्त्वदोषस्यापादकत्वात्। क एवमनुन्मत्तः परितापबहुलजन्मपरम्पराभिर्जन्तूननिशमुपतापयतो भगवतः करुणामेव सृष्टिकारणमुत्प्रेक्षेत। कथञ्चित्करुणया सर्गसमर्थनेऽपि प्रलयोपपादनदोषस्यन्तादवस्थमेव। लीलापक्षेत्वयमदोषः। दृश्यते हि पीडाबहुलेतपकरणैरनभिसन्धिमधुरैर्भूरिशः क्रीडितं स्वतन्त्राणाम्। अतएव च "लोकवत्तु लीलाकैवल्यमिति" बादरायणं सूत्रं संगच्छते। तथाहि आम्नायते "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व" "तत्सत्यं स आत्मा तत्त्वमसी"त्यादि, तच्च च जगज्जन्मादि कारणत्वं ब्रह्मणो घटापथायितं वर्त्तते। तच्चाद्वितीयकूटस्थचिदात्मनो नाञ्जस्येनोपपद्यते, इति मायाद्वारेणैवोपपादयितव्यम्। अघटनघटनापटीयस्यां परमात्मशक्तिभूतायां चानिर्वाच्यतुच्छादिव्यपदेशभाजि मायायां सर्वं चैतदुपपद्यतरम्। लीलाया अप्युपकरणमन्तरेणाद्वैते न परमार्थतः सम्भावनेति बहुप्रपंचसाधनसध्रीचीनाया मायाया एव तदुपकरणभावपर्य्यवसानौचित्यात्। अत एव महेन्द्रजालकल्पताऽपि प्रपञ्चस्य तत्र तत्रोक्ता संगच्छते, एतेन भगवतोऽपि विविधदुःखवेदनासादितनिर्वेदप्रयुक्तः कदाचिल्लीलाविच्छेदः, लीलायामप्यानन्दलेशानुसन्धानावश्यम्भावेन पूर्णत्वश्रुतिव्याकोपश्च प्राप्नुयादिति समाहितम्। मायाविवत् कल्पितसर्वस्वायां लोकोत्तरसामग्रीमर्य्यादायां लीलायां निखिलस्य पर्य्यनुयोगस्यापि निरवकाशत्वात्। नह्यलातचक्रगन्धर्वनगरादयः प्रयोजनमपेक्ष्यैव समुज्जृम्भन्ते। मायाविनोऽपि वा तानि तानि दर्शनीयवैभवानि वस्तुसत्फलमपेक्षन्ते। चमत्कारैकसाराणां तेषां लोकसम्मोहनमेव प्रयोजनमपेक्षितमस्तीति चेत् समानमुभयत्रापि, तद्द्वारेणार्थप्रतिपत्तिः प्रयोजनं तत्रातिरिच्यत इति चेत्, तुल्यं प्रकृतेऽपि, भगवल्लीलयैवाखिलपुरुषार्थप्रतिपत्तेः। वस्तुतस्तु न परमार्थतोऽस्ति जगत् नातस्तद्र-

धनार्थो नास्तिकी प्रवृत्तिरिति कृतं प्रयोजनसत्त्वासत्त्वविकल्पजालकल्पनया । केवलन्तु द्रष्टृबुद्धिसमाधानायोपादेयस्य जगत्कर्तृत्वस्यासत्योपायस्य कथंतानिवृत्तिः स्वभाववक्षणाद्विपत्तेरुक्तदिशाऽव्यवस्थादिदोषप्रसङ्गाद् विनैव लौकिकसाधनप्रयोजनादिमर्य्यादामन्यच लीला लोकेऽपि बहुलमुपलब्धेति सम्भाव्यमानप्रवृत्तिकया लीलया सामञ्जस्यं संभवदुक्तिकमित्येतावन्मात्रे न्यायादिपर्य्यवसानं युज्यते । असत्याच्चोपायात्सत्यभूतस्योपेयस्य प्रतिपत्तावविप्रतिपत्तिः । नहि रेखाक्षराणि वस्तु सन्ति, न च तेभ्यः सत्यस्य गकाराक्षरस्य न प्रतिपत्तिः । न वा स्थूलारुन्धत्यसत्यापि ततो लोकानां नैव भवति परमार्थसत्या अरुन्धत्याः प्रतिपत्तिः । विनेयबुद्ध्यनुग्राहिणी हि पर्य्याप्ता भवत्युपायपरिगृहीतिः, तदुक्तम्, “उपायाः शिक्षमाणानां बालानामुपलालनाः । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते” इति । अन्यत्र च “देशना लोकनाथानां सत्त्वाशयवशानुगाः । भिद्यन्ते बहुधा लोक उपायैर्विविधैः किल । गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणाः” । इत्थं चागमाः स्वतः प्रमाणमपि न परमार्थतः परमात्मनो जगज्जन्मादिकं प्रतिपादयितुमेव प्रवृत्ताः । तावन्मात्रे प्रयोजनाभावात् । परंतु तत एव सृष्ट्यादिकं प्रतिपाद्य ततोऽन्यथानुपपन्नस्य तस्य तत्रैव निषिध्यमानस्य स्वाप्नगजादिन्यायेनालीकत्वेऽद्वितीयसदात्मानमवधारयितु मित्यतः कथंचिदपि प्रयोजनादिपर्य्यनुयोगो नावकाशमासादयितु मलमिति ॥ ४२ ॥

(क्रमशः)

अद्वैतवाद-प्रभाकरः ।

२ य भागस्य ५० पृष्ठतोऽनुवृत्तः ।

श्वेताश्वतरोपनिषदि “किं कारणम् ब्रह्म” इत्यादिविकल्प्य “ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैः निगूढाम्”इति देवस्य द्योतनात्मकस्य ब्रह्मणः आत्मशक्तिं स्वरूपभूतां शक्तिं “मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्” इति वक्ष्यमाणैकवाक्यात् मायां, कारणत्वेन अपश्यन् इति मायाकारणत्वं निश्चित्य कालादीनां कारणत्वं निराकृत्य “तमेकनेमिम्”इत्यादिना सर्व्वात्मकब्रह्मैककारणकं संसारं चक्ररूपेण नदीरूपेण च दर्शयित्वा “सर्वाजीवे सर्वसंस्थे बृहन्तेऽस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे । पृथगात्मानं

प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" इति मन्त्रेण संसारमोक्षयोः हेतुः प्रदर्शितः। सर्वेषाम् आजीवनम् अस्मिन् इतिसर्वाजीवे सर्वात्मके, सर्वेषां संस्था प्रलयो यस्मिन् रजतस्येव शुक्त्यादौ तस्मिन् सर्वेषाम् अधिष्ठानभूते ब्रह्मचक्रे आत्मानं जीवात्मानं प्रेरितारञ्च ईश्वरं पृथक् भेदेन मत्वा अन्योऽसौ अन्योऽहमिति भेददर्शनेन भ्राम्यते सुरनरतिर्य्यगादिभेदभिन्ननानायोनिषु भ्राम्यमाणः परिवर्त्तते, एतद्भेददर्शनं संसारहेतुः। जुष्टः सेवितः, तेनेश्वरेण चिदानन्दाद्वितीयब्रह्मात्मना अहं ब्रह्मास्मीति समाधानं कृत्वा, तेन अमृतत्वं मोक्षम् एति, एकत्वदर्शनं मोक्षहेतुरित्यर्थः। तथाच बृहदारण्यके अभेददर्शनस्य मोक्षहेतुत्वं, भेददर्शनस्य च संसारहेतुत्वं प्रदर्शितम्,—"य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति इति "तस्य ह न देवाश्च नाभूत्या ईशते आत्मा ह्येषां स भवति अथ योऽन्यां देवतामुपास्ते अन्योऽसौ अन्योऽहमस्मीति न स वेद यथा पशुरेव स देवानामिति। श्रीविष्णुधर्म्मे च "पश्यत्यात्मान मन्यन्तु यावद् वै परमात्मनः। तावत् संभ्राम्यते जन्तुर्म्मोहितो निजकर्म्मणा"॥ "संक्षीणाशेषकर्म्मा तु परं ब्रह्म प्रपश्यति अभेदेनात्मनः शुद्धं शुद्धत्वादक्षयो भवेदिति॥" पूर्वोक्तार्थसिद्ध्यर्थे व्यवहारावस्थायां जीवेश्वरयोरुपाधितो विभागं दर्शयित्वा तद्विज्ञानादमृतत्वं दर्शयति "संयुक्तमेतत्क्षरमक्षरञ्च व्यक्ताव्यक्तं भरते विश्वमीशः। अनीशश्चात्मा बध्यते भोक्तृभावाज्, ज्ञात्वा देवं मुच्यते सर्वपाशैरिति॥" "अनन्तश्चात्मा विश्वरूपो ह्यकर्त्ता त्रयं यदा विन्दते ब्रह्ममेतदिति च॥" एवं भोक्तृभोगभोग्यरूपं मायात्मकत्वाद्, अधिष्ठानभूतब्रह्मव्यतिरेकेण नास्ति, किन्तु ब्रह्मैवेति यदा विन्दते तदा वीतशोकः भवतीत्यर्थः। अथवा त्रयशब्देन ज्ञाताज्ञात्मक-जीवेश्वरप्रकृतिरूपत्रयं ब्रह्माभिन्नतया यदा विन्दते तदा मुच्यते इत्यर्थः। ततश्च अध्यायान्तं यावत् ज्ञानोपायः प्रदर्शितः। अथ द्वितीयाध्याये बहुधा योगमभिधाय "यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत्। अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैरिति जीवब्रह्मणोरैक्याद् जीवतत्त्वसाक्षात्कारेणैव ब्रह्मणः साक्षात्कारः मोक्षकारणतया उक्तः। अथ तृतीये य एको जालवान् ईशत ईशनीभिः। सर्वान् लोकान् ईशत ईशनीभिः य एवैकः उद्भवे सम्भवे च य एतद्विदुरमृतास्ते भवन्ति।" "एको हि रुद्रः न द्वितीयाय तस्थुः य इमान् लोकान् ईशत ईशनीभिः। प्रत्यङ्जनांस्तिष्ठति स चुकोपान्तकाले संसृज्य विश्वभुवनानि गोपाः॥" "विश्वतश्चक्षुरुत विश्वतोमुखः विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति

सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥" "सहस्रशीर्षा पुरुषः" "पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ॥" "सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ॥" सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी स भगवांस्तस्मात् सर्वगतः शिवः ॥" इत्यादिमन्त्रैः अद्वितीयस्य परमात्मनः मायाख्येशनीशक्तिविशेषेण वैश्विकीशितृत्वादिभावं सर्वात्मकत्वञ्च उक्त्वा "अपाणिपादो जवनो ग्रहीतेत्यादि-मन्त्रे निर्विकारानन्दस्वरूपम् अनुदितास्तमितज्ञानात्मना अवस्थितं परमात्मानं दर्शयित्वा "वेदाहमेतमजरं पुराणम्, सर्वात्मानं सर्वगतं विभुत्वात् जन्मनिरोधं प्रवदन्ति यस्य ब्रह्मवादिनो हि प्रवदन्ति नित्यम् ॥" इति मन्त्रद्रुशः सर्वात्मानु-भवः दर्शितः । गहनत्वादर्थस्य पुनरपि चतुर्थेऽध्याये आत्मनः सर्वात्मकत्वम्, मायया सृष्टिकर्तृत्वञ्च दर्शयति,—"य एकोऽवर्णो बहुधाशक्तियोगात्" "तदेवाग्नि स्तदादित्यस्तद्वायुस्तदु चन्द्रमाः" "त्वं स्त्री त्वं पुमानसि" "नीलः पतङ्गो हरितो लोहिताक्षः।" "अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्योमायया सन्निरुद्धः ॥" "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" "यो योनिं योनिमधितिष्ठत्येक" इत्यादि मन्त्रैः । अन्ते च बहुधा सर्वात्मकात्मज्ञानं मोक्षसाधनाय प्रपञ्चितमिति । एवञ्च श्वेताश्वतरोपनिषदि अपि सर्ववेदान्तप्रत्ययस्य एकात्मदर्शनरूपस्य सम्यग्-ज्ञानस्य न लेशतोऽपि अन्यथात्वं विद्यते । सम्यग्ज्ञानस्य बाधनाय उपासनापर-त्वादिकल्पनया अप्राकृतविविधानर्थकल्पनेन यदुपनिषद्वाक्यान्यथाव्याख्यानं मालाकृतस्तद्विद्वन्मर्यादालङ्घनायैवेति सुधीभिर्विभाव्यम् ।

तथा ह्येतत् संक्षेपतः किञ्चिदुच्यते,—यदेतदुक्तम्—"अत्र कार्यसामान्ये कालो-ऽदृष्टमीश्वरस्तदिच्छाच, बहिरिन्द्रियग्राह्यभावसामान्ये भूतानि द्व्यणुकादिषु कार्यद्रव्येषु भूतविशेषान्तर्गतास्तत्तत्परमाणवः, सुखदुःखादौ जीवात्मा कारणत्वेनाम्नायते "कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् । संयोग एषां नत्वात्मभावादात्माप्य-नीशः सुखदुःखहेतोरिति तदीयमन्त्रः ।" इति

तदेतच्छ्रुत्यर्थावधारणविरहविजृम्भितमिति नाप्रत्यक्षं विदुषाम् । तत्रादौ ब्रह्मवादिनां ' ॐ ब्रह्मवादिनोवदन्ति किं कारणं ब्रह्म कुतःस्म जाताः? जीवाम केन क्व च संप्रतिष्ठाः । अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदोव्यवस्थां "-इति "जाताः" "जीवाम" "संप्रतिष्ठा" इतिशब्देभ्यः उत्पत्तिस्थितिलयका-रणेषु विप्रतिपत्त्या प्रश्नोऽवगम्यते । ततः ब्रह्मकारण-प्रतिपक्षभूतानि कालादीनि लौकिककारणतया उपस्थितानि विचारविषयत्वेन चिन्त्यमित्युक्त्वा तर्कापरपर्या-

येण विरोधियुक्तिपरिहारात्मकेन मननेन कारणत्वाभावः "संयोग एषां न त्वात्मभावादि"त्यादिना निश्चितः, तत्रैषा युक्तिः,—किं कालादीनां प्रत्येकं कारणम्? उत तेषां समूहः? नच प्रत्येकं कालादीनां कारणत्वं सम्भवति, दृष्टविरुद्धत्वात्। देशकालनिमित्तानां संहतानामेव लोके कार्य्यकारणत्वदर्शनात्। नचाप्येषां कालादीनां संयोगः कारणम्, समूहस्य संहतेः परार्थत्वेन शेषत्वेन शेषिण आत्मनः चिद्रूपत्वाद् अस्वातन्त्र्यात्, सृष्टिस्थितिप्रलयनियमलक्षणकार्य्यं करणत्वायोगात्। एतेषां कारणत्वसिद्धान्तकल्पनन्तु,—"नतु" इतिपरपक्षप्रतिप्रतिषेधार्थस्य 'तु' सहकृतनञ्शब्दस्य गजनिमीलिकया अदर्शननिमित्तमेव प्रतिभाति। तथार्थत्वे पूर्वोक्ता युक्तिरपि विरोधिणी। वक्ष्यमाणयोगिप्रत्यक्षदर्शनात्मकसिद्धान्तस्यच व्याघातः सम्पद्येत। श्रुतौ परमाण्वादि कारणत्वस्य अनुल्लेखेऽपि तेन परमाणुत्वेन व्याख्यातानां भूतानां खण्डनीयप्रवाहपतितत्वात् एवं व्याचक्षाणेन स्वपदे एव कुठारः प्रहितः। मननेन सिद्धार्थस्य प्रत्यक्षेण प्रमापयितुं ते ध्यानयोगेन तादृशं सृष्टिस्थितिप्रलयहेतुम् आत्मशक्तिभूतम् मायारूपकारणम् प्रत्यक्षेण ज्ञातवन्तः इत्युक्तम् तृतीयेन मन्त्रेण "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैः निगूढामि"ति। अतोऽस्या उपनिषदः उपक्रमभूतमन्त्रत्रये मायाशबलस्य ब्रह्मणः कारणत्वं मननेन योगिप्रत्यक्षेण च सिद्धतया आम्नातं स्फुटमुपलभ्यते। अन्येषां च मन्त्राणां ऋजुमार्गेणैव पूर्वोक्तव्याख्यानेन अद्वैतपरत्वस्य गतत्वात् न पुनस्तस्य अप्रमाणिकाप्रकृतक्लिष्टव्याख्यानेन द्वैतपरत्वोपपादनाय कृतस्य व्याख्यानस्य खण्डनाय प्रयत्नान्तरमास्थेयम्। अद्वैतविज्ञानस्य मोक्षजनकत्वेन श्रीमतां मालाकृतामपि अभिप्रेतत्वेन तत्रैव श्रुतेः साफल्यं सर्वसम्मतम्, अतः तस्यैव मुख्यार्थत्वस्य कल्पनीयत्वात् न तत्रान्याय्यकल्पना युक्तिमती। नच द्वैतविज्ञानस्य किमपि फलं दृश्यते, तस्य श्रेयःसाधनत्वाभावात्, अतो बालकल्पितद्वैतमनूद्य जननीव पुत्राधिकारविशेषमनुवर्त्तमाना तथोपदिशति यथा सर्व एव सर्वानर्थपरिहाराय शक्नुयात् इति। तथाहि—कांश्चिदुत्तमाधिकारिणः तथ्यभूतमद्वैतमेवापवर्गाय साक्षाद् ग्राहयति,—"सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादि। कांश्चिन्मध्यमान् "नेति नेति" "नेह नानास्ति" "अस्थूलमनणु"मित्यादिना द्वैतं निषिध्य अद्वैतं बोधयति। कांश्चित्तु अतथ्यभूतम् उपासनमुपदिशति; चरमफलन्तु अपवर्ग एवेति न कस्यचित् किञ्चिदनर्थापातशङ्कापीति निरवद्यम्।

इति श्रीरमेशचन्द्र देवशर्म्मकृते द्वैतोक्तिरत्नमाला-
प्रत्यादेशे अद्वैतवाद-प्रभाकरे प्रथमः करः।

शिवि-चरितम् ।

प्राणैरपि सदा रक्षेद् अतिथिम् शरणागतम् ।

आसीत् पुरा शिविर्नाम भू-विश्रुतः कश्चित् परमधार्म्मिको नरपतिः । स एकदा सत्र * मश्वमेधं समाधयन् प्रतिज्ञातवान् यत् तेन तस्मिन् दिवसे सर्व्वेषामेव सकला प्रार्थना पूरयिष्यत इति । वस्तुतस्तु नाभवत्तस्य महात्मनस्तस्मिन् विख्याते यज्ञे कोऽप्यपूर्णमनोरथः ।

अथ तस्य धर्म्मपरीक्षणार्थं सुधर्म्मेयि † देवैर्मन्त्रितम् "वय केचिद् वा गत्वा महीतलं महीपालममुं शिविं सम्यग् ज्ञास्यामः" । एवं निर्द्धारिते देवो वैश्वानरः ‡ कपोतशरीरं परिगृह्य द्रुतं मर्त्यमभ्यधावत् । सुरेन्द्रश्च श्येनमूर्त्तिः कपोतधर्षणाकाङ्क्षयेव तमनुवेगेन धावति स्म । अथ कपोतः शरणार्थी अशरण-शरणं तं कृपाधनं शिविं शरणमभ्यगात्, अवोचच्च "अहो अब्रह्मण्यम्, अब्रह्मण्यम्, श्येनभीतोऽहं कपोतः भवतः शरणागतः तद् रक्षतु मां महाभागः शमनकवलादिव श्येनकवलात् । राजा च तमङ्के कृत्वा तस्मै अभयं प्रादात् । अथान्तरे श्येनोऽपि क्षुत्क्षामकण्ठः सत्वरं धावन् नृपसदनमुपाजगाम प्रोवाच च–"महाराज! परित्यज्यतामयमस्मदीयानां श्येनजातीयानां भक्ष्यः कपोतः । कथं क्षुधितस्य मे भक्ष्यमिममाच्छिद्य अधर्म्मं क्रियते कर्म्म धर्म्मवता महाराजेन?"

राजोवाच–"अये विहङ्गराज! मैवं वद। शरणागतरक्षणं हि राजधर्म्मः । कपोतोऽयं भवतः त्रासितः मामेव शरणमुपागतः । तन्नालमस्मि कथमप्येनं परित्यक्तुम् । यो हि भीतं शरणागतं च शत्रवे प्रयच्छति तस्य किल सर्व्वाण्येव नश्यन्ति सुकृतानि ।

श्येनेनोक्तम्–"महाभाग! श्रूयन्ते सर्व्वा एव ते शास्त्रवाचः, परं भक्ष्यहरणेन क्षुधितस्य प्राणहननमेव किं राजधर्म्मः? क्षाक्षमूर्ते प्राणा मे चौष्ठप्रान्तगताः । अपि च भोजनाभावात् पितरौ मे दाराः पुत्राश्च सुतरामेव असून् मोक्ष्यन्ति । अतो नार्हसि त्वम् एकस्य हेतो र्बहून् प्राणिनो हन्तुम्" ।

शिविरुवाच–"यद्येवं ते समारम्भः तदा गृह्यतामस्य विनिमयेनान्यविधं

---

* सत्रम् = यज्ञः ।

† सुधर्म्मेयि = देवसभायाम् ।

‡ वैश्वानरः = अग्निः ।

किमपि प्रचुरं खाद्यम् । परित्यज्यतामस्मिन् भीतिविह्वले स्वल्पकाये कपोतके तवास्यायिनी रसनालालसा ।"

श्येनः प्रत्यवदत्–"राजन् ! न प्रार्थयेऽहं कपोतादन्यत् किमपि खाद्यं विधिना दत्तो ममैव आहारः, तदेव एव मे प्रदीयताम्" ।

राजा पुनरपि मधुरया गिरा अभाषत–"शरणागतरक्षणं हि राज्ञां धर्म्मः, तद् वचनशतेनापि कपोतोऽयं त्यक्तुं न युज्यते, त्यजेयं वै प्राणान् नैव कपोतमिमं समर्पयेयम् । एनं विना मम राज्यं वा जीवितं वा यदन्यद्वा कामयसे तत्तेऽवितथं दास्यामि ।"

श्येनः–"भो धर्म्मज्ञ ! यदि एतादृगेव भवतो निश्चयस्तदा देहि मे कपोतमितं मांसं उत्कृत्य तव शरीरात् ।" एवमुक्तः शिविः सानन्दं ब्रूते– "धन्योऽहमद्य यत् स्वदेहमांसदानेनापि शरणागतं रक्षेयम ।" इत्युक्त्वा स प्रहृष्टमना आदाय निशितं शस्त्रं परिगृह्य च तुलामेकां यावत् स्वदेहात् मांसमुत्कृत्य तुलायां धारयामास तावत् कपोतः अधिकभारः संजातः । अथ पुनरपि तेन मांसं छित्त्वा तत्र योजितम् इदानीमपि गुरुतरः कपोत एव । इत्थं क्रमेण प्रायः सर्व्वमेव मांसं स्वदेहात् उत्कृत्य तुलायां स्थापितं तथापि गुरुतर एव कपोत आसीत् । अथ निर्म्मांसोऽसौ महीपालः तदा स्वयमेव तुलामारुरोह ।

एवं सत्यसन्धस्य शिवेः शरणागतरक्षार्थमात्मदानं विलोक्य देवा अम्बरात् पुष्पाण्यवर्षन् । श्येनोऽपि शक्रः स्वरूपं विधृत्य राजानमवोचत् "धन्योऽसि यत्त्वया परार्थे महानात्मत्यागः प्रदर्शितः । त्वमेव जानासि भो धर्म्मस्य प्रकृतं तत्त्वम् । एषा महती कीर्त्तिः जगति शाश्वती स्थास्यति । कीर्त्तिमतस्तेऽतः परं त्रिदिवे निवासो भवेत् । अहमस्मि वासवः श्येनरूपं परिगृह्य त्वां परीक्षितुमभ्युपागतः । एषोऽयं कपोतरूपधृग् हुताशनः । अस्मद्वचनेन कलेवरं ते पूर्व्वाकाराद्रुचिरतरं नीरुजं च भवेत् । सुचिरमिदानीं राज्यं पालयित्वा देहान्ते अमृतान् दिव्यलोकान् भोक्ष्यसे" । इत्युक्त्वा मघवा वह्निना सहान्तर्दधे ॥

———

श्रीभाष्यम् ।

२ य भागस्य ३८ पृष्ठतोऽनुवृत्तम् ।

भा० । सेयं स्मृतिर्दर्शनरूपा प्रतिपादिता, दर्शनरूपता च प्रत्यक्षतापत्तिः, एवं प्रत्यक्षतापन्नामपवर्गसाधनभूतां स्मृतिं विशिनष्टि "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन, यमेवैष वृणुते स तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वामिति" अनेन केवलश्रवणमनननिदिध्यासनानामात्मप्राप्त्यनुपायत्वमुक्त्वा "यमेवैष आत्मा वृणुते तेनैव लभ्यः" इत्युक्तम् । प्रियतम एव हि वरणीयो भवति, यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवति । यथायं प्रियतम आत्मानं प्राप्नोति, तथा स्वयमेव भगवान् प्रयतते इति भगवतैवोक्तम् "तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते" इति । "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इति च । अतः साक्षात्कार-रूपा स्मृतिः, स्मर्यमाणात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रिया यस्य स एव परमा-त्मना वरणीयो भवतीति तेनैव लभ्यते परमात्मेत्युक्तं भवति, एवं रूपा ध्रुवानु-स्मृतिरेव भक्तिशब्देनाभिधीयते ।

टी० । पूर्वोक्तयुक्त्या विशेषान्तरबोधकशब्दसहकृतवेदनादिशब्दानाम् अविच्छिन्नस्मृति-सन्ततिरूपता उक्ता, इदानीमस्याः स्मृतेः वाक्यकाराभिप्रेतदर्शनरूपतां प्रतिपादयति, "सेयमि"ति । सेयम् = असकृदावृत्तिरूपा चेत्यर्थः प्रत्यक्षाप्रत्यक्षयोर्दर्शनशब्दप्रयोगदर्शनात् अर्थसन्देहनिरासायाह,-"दर्शनरूपताचे"ति । प्रत्यक्षतापत्तिः = प्रत्यक्षतुल्याकारताप्राप्ति-रित्यर्थः । एतच्च "आत्मा वा अरे द्रष्टव्यः" इत्यादिश्रुतौ "आत्मनि खल्वरे दृष्टे श्रुते" इत्यादौ च श्रवणादिपरोक्षज्ञानाद् दर्शनस्य पृथक्तया अभिधानादस्य प्रत्यक्षरूपतासिद्धेरित्यर्थः । श्रुतिसिद्धम् अन्यमपि विशेषं दर्शयति,-एवमिति प्रवचनादीनां परोक्षज्ञानसाधनानां निषेधा-त्मकाद्विशेषात् प्रत्यक्षरूपदर्शनस्यैव मोक्षसाधनता अवगम्यते इत्यर्थः । अनया श्रुत्या श्रवणा-दीनां मोक्षोपायत्वनिषेधाद,-उपासनस्यैव मोक्षहेतुता सिद्धा, अतोऽस्यासाधनत्वाशङ्का निरस्ता । "एवम्" = पूर्वोक्तयुक्त्या सामान्यवाचकशब्दस्यापि कस्माच्चिद् विशेषाद् विशेषार्थबोधकतया प्रत्यक्षतापन्नाम् इत्यर्थः । अपवर्गसाधनभूतामित्यनेन प्रतीकोपासन-व्यवच्छेदः । "नायमात्मेति,"-"-"प्रवचन" शब्देन कार्य्ये लक्षणया मननं प्रतिपाद्यते । प्रोच्यते अनेनेति व्युत्पत्त्या वा "प्रवचन" शब्देन मननमुच्यते । "मेधा" = निदिध्या-सनम् । अनेन वाक्येन श्रवणमननादीनां निषेधे सत्यपि ध्रुवानुस्मृतेः साधनत्ववाहकं किमपि नियामकं नास्तीत्यतः-श्रुतिप्रतीकं व्याचष्टाय आह "अनेन" इति । "एषः" परमात्मा भगवान्

ईश्वरः, यं = ध्रुवानुस्मृतिरूपभक्त्या सेवमानं, वृणुते = अनुगृह्णाति, स = भक्तः, तेन = परमात्मना, लभ्यः = अनुग्राह्यः, तस्य = भक्तस्य, आत्मा = भगवान्, स्वां तनूं = स्वस्वरूपमित्यर्थः । अनेन एतदुक्तं भवति,–ध्रुवानुस्मृतिरूपया भक्त्या एव परमात्मा लभ्यते, न भक्त्यादिहीनेन केवलेन श्रवणादिना । स आत्मा वरणीयेन लभ्य इत्युक्तः, एतेन कथं ध्रुवानुस्मृतिरूपः विशेषः लभ्यते इत्याशङ्क्य ध्रुवानुस्मृतिलाभार्थे लोकसिद्धप्रतीतिमाह, "प्रियतम एव ही"ति प्रियतमशब्देन प्रीतेरुत्कर्षलाभाद् न प्रीतिविषयमात्रस्य वरणीयत्वम्, अपितु स्वयमुपस्थितस्य भगवतः स्वीकार एव । फलितमर्थमाह,–"यस्यायमि"ति । यस्योपासकस्यायं परमात्मा निरतिशयप्रीतिविषयः स एवास्य परमात्मनो निरतिशयप्रीतिविषयो भवति । "स एव" = तादृशनिरवच्छिन्नस्मृतिधारायुक्तः, "एव" कारेण-ध्रुवानुस्मृतिविरहितकेवलश्रवणादिः व्यावर्त्यते ।

भगवति प्रीतिमति सति तस्य सेवकस्य प्रीतिविषयत्वे प्रमाणं प्रदर्शयितुमादौ प्रमाणवाक्यस्य फलीभूतार्थमाह,–"यथायमि"ति । "प्रियतमः" = निरतिशयभगवत्प्रीतिविषयः । एतेन "भजतां प्रीतिपूर्वकमि"त्यस्यार्थः अनूदितः । "स्वयमेव प्रयतत" इत्यनेन "ददामि बुद्धियोगमि"त्यस्यार्थ उक्तः । अनेन वरणप्रकारोऽपि कथितः । इदानीं भगवद्वाक्यरूपं प्रमाणं दर्शयति,–"भगवतैवोक्तमि"ति । एवकारेण अनाप्तोक्तिव्यावृत्त्या भगवदाप्त्यतिशयः सूचितः । अनेन उपास्योपासकयोः परस्परप्रीतिर्दर्शिता । सततयुक्तशब्दार्थं स्फुटीकर्तुमाह,–"प्रियो ही"ति । अत्यर्थं निरतिशयं, वाचामगोचरमित्यर्थः । एवं परस्परप्रीतिमत्त्वकथनेन ध्रुवानुस्मृतेः किमायातमित्याशङ्कायामाह,–"अत" इति, अतः = ध्रुवानुस्मृतिवचनाद्, वरणीयस्य भगवति निरतिशयप्रीतिमत्त्ववचनाच्चेत्यर्थः । "साक्षात्काररूपते"त्यनेन पूर्वोक्तप्रत्यक्षात्मकता स्मारिता । "स्वयमप्यतिशयप्रिया" इत्यस्य अत्यर्थप्रीतिरूपेत्यर्थः । श्रुतिस्मृत्यादौ, स्वोक्ते "शेमुषी भक्तिरूपे"त्यादौ च भक्तेरपवर्गसाधनत्वावगमाद् ध्रुवानुस्मृतेरपवर्गसाधकत्वं विरुद्धमित्याशङ्क्याह,– "एवं रूपे"ति । एवंरूपा = साक्षात्प्रीतिरूपत्वपर्यन्ता ध्रुवानुस्मृतिरेव भक्तिशब्दवाच्येत्यर्थः । नातः अनयोर्वाक्ययोर्विरोधः ।

मेघवाहन-चरितम् ।

(परोपकाराय सतां विभूतिः ।)

आसीत् पुरा काश्मीरप्रदेशे जयेन्द्रो नाम कश्चिद् भूमीन्द्रः । स च महीमिमामनुगतां वधूमिव सुखं बुभोज ।

सुतो महीमहेन्द्रस्य जयेन्द्रस्तस्य भूपतेः ।
क्ष्माम् * आजानुभुजो राजा बुभोजाथ पृथुप्रथः ॥

(राजतरङ्गिण्याः २ यतरङ्गे ६३.)

तस्यासीत् सन्धिमतिर्नाम कश्चन सचिवः मतिमतां वरः । उपरते तु तस्मिन् अपुत्रके राजनि जयेन्द्रे स सन्धिमतिरेव (सन्धिमान् इत्यपि पाठो विद्यते) सुभागधेयतया राजपदमधिचकार † । धर्म्मप्रायोऽसौ महात्मा सततं धर्म्म्यकर्म्मणैव कालं नयति स्म । तस्य प्रकृतयस्तु राज्ञः शमव्यसनितामुदासीनतां च राजकर्म्मणि अवेत्य तस्मिन् सप्तचत्वारिंशद्वर्षाण्युपागते अपरं कमपि वीर्य्यवन्तं विजिगीषुं च राजपुत्रमितस्ततोऽन्वीषुः । ततस्ताः प्रजाः अचिरेणैव मेघवाहनं नाम कञ्चन श्रीमन्तं राजपुत्रमवापुः ।

अन्वेष्यत नृपस्ताभिः कश्चिद् राज्याय शुश्रुवे ।
राजपुत्रो जिगीषुश्च श्रीमान् यौधिष्ठिरे कुले ॥

(राजतरङ्गिणी ३ । २४४ ।)

अयमेव हि जिगीषुः राजपुत्रो मेघवाहन इति नाम्ना प्रसिद्धिं गतः । तस्य पितृपुरुषो युधिष्ठिरः (नायं तावत् पाण्डुपुत्रः) कदाचित् काश्मीरस्यैवाधिपतिर्बभूव । दैववशाद् युधिष्ठिरस्य प्रपौत्रः गोपादित्यः काश्मीरेश्वरस्य पराभवमिच्छता गान्धारपतिना परिपालितोऽभूत् ।

जुगोप गोपादित्याख्यं काश्मीरेन्द्रजिगीषया ।
युधिष्ठिरप्रपौत्रं हि गान्धाराधिपतिस्सदा ॥ १४५ ॥
असम्प्राप्तसाम्राज्यः (१) स तत्र तनयं क्रमात् ।
अवाप लक्षणोर्दर्व्यैरमोघं मेघवाहनम् ॥ १४६ ॥
स युवा पितुरादेशाद् वैष्णवान्वयजन्मनः ।
राष्ट्रं प्राग्ज्योतिषेन्द्रस्य ययौ कन्यास्वयम्वरे ॥ १४७ ॥
(२) तत्र तं वारुणं छत्रं छायया राजसन्निधौ ।

---

* क्ष्माम्—पृथिवीम् ।

† सन्धिमतेर्जीवनवृत्तान्तः अवान्तरव्यापारतया अत्यद्भुतोऽपि परित्यज्यते ।

(१) असम्प्राप्तसाम्राज्यः—स्वराज्यं न प्राप्यापि ।

(२) तस्मिन् स्वयंवरे बहूनां नरपालानामन्तिके सा कन्या 'अमृतप्रभा' वरमाल्येन तमेव मेघवाहनं वृतवती । वरुणस्य छत्रमपि तं मेघवाहनं छायया सिषेवे ।

भेजे वरस्रजा राजकन्यका चामृतप्रभा ॥ १४८ ॥

*　　*　　*　　*　　*　　*

तमन्तिकं पितुः प्राप्तं पत्न्या लल्या च संश्रितम् ।
भुवा निमन्त्रयामासुर्मन्त्रिणो वंशयोग्यया ॥ १५१ ॥ (द्वितीयतरङ्गः)

*　　*　　*　　*　　*　　*

(१) अथोल्लसत् पृथुश्लाघमानिन्युर्मेघवाहनम् ।
गान्धारविषयं गत्वा सचिवाधिष्ठिताः प्रजाः ॥ १ ॥

(तृतीयतरङ्गः)

कल्याणिना प्राणिवधे तेन राष्ट्राद्विवारिते ।
निष्पापां प्रापिता वृत्तिं स्वकोशाच्छौनिकादयः ॥ ३ । ६ ॥
भोगाय चैत्यभिक्षूणां वल्लभास्यामृतप्रभा ।
विहारमुच्चैरमृत-भवनाख्यमकारयत् ॥ ३ । ८ ॥
अर्व्वाक्कालोद्भवस्यापि राज्यकालोऽस्य भूपतेः ।
न्यक्कृतादिनृपोदन्तैः ऐत्तान्तैरद्भुतोऽभवत् ॥ ३ । १५ ॥
अथ ग्राहयितुं भूपानाज्ञां हिंसानिवृत्तये ।
स दिग्जयाय निर्व्याज-धर्म्मचर्य्यो विनिर्ययौ ॥ ३ । २७ ॥
अथ वेलावनोपान्तात् तेनार्त्ताक्रन्दितध्वनिः ।
मेघवाहनराज्येऽपि हतोऽयमिति शुश्रुवे ॥ ३ । ३१ ॥
तप्तायःशङ्कुनेवान्तर्व्रणितः स द्रुतं ततः ।
सञ्चारितातपत्रेण सत्रा तां वसुधामगात् ॥ ३ । ३२ ॥

---

(१) सन्धिमतेः सचिवाः प्रजाश्च तदानीं गान्धारदेश-प्रत्यागतं मेघवाहनं काश्मीरसिंहासनमभिप्रापयामासुः ।

३ । ६ ॥ प्राणिवधप्रतिपक्षोऽसौ राजा स्वराज्यात् पशुपक्षिवधादिकं दूरीकृतवान्, पशुजीविनः व्याधांस्तु स्वकीयधनकोषाद्धनादिना तोषयामास ।

३ । ८ ॥ चैत्यभिक्षूणां—देशीयसन्न्यासिनाम् । विहारम् = बौद्धमठम् ।

३ । १५ ॥ अर्व्वाक्कालोद्भवस्य = परवर्त्तिकालोत्पन्नस्य । न्यक्कृतादिनृपोदन्तैः = न्यूनीकृतपूर्व्वपूर्व्वराजव्यापारैः । स राजा मेघवाहनः पुण्यकर्म्मभिः पूर्व्वपुरुषान् अतिचक्राम ।

३ । २७ ॥ स भूपालः स्वयमहिंसाव्रत आसीत् । अतः अपरानपि राज्ञः हिंसानिवृत्तये आदिदेश ।

३ । ३२ ॥ तप्तायःशङ्कुना = उष्णलोहशलाकया । सञ्चारितातपत्रेण = विस्तारितछत्रेण, वर्णयादत्तेन छत्रेण ॥ सत्रा = सह, सार्द्धम् ॥

अपश्यद्वत्र केनापि चण्डिकायतनायतः ।
नरं शबरसेनान्या हन्यमानमधोमुखम् ॥ ३ । ३३ ॥
'धनात्मज धिगेतत् ते कुकर्म्मेति' महीभुजा ।
तर्ज्जितः स भयादेव शबरस्तं व्यजिज्ञपत् ॥ ३ । ३४ ॥
"शिशुर्मुमूर्षुर्मे राजन्नयं रोगार्द्दितः सुतः ।
कर्म्म तद्दैवतैरुक्तमस्य श्रेयोलवावहम् ॥ ३ । ३५ ॥
उपहारनिरोधेन सद्य एष विपद्यते ।
बन्धुवर्गमशेषं च विद्धि तज्जीवजीवितम् ॥ ३ । ३६ ॥
अरण्यगहनाल्लब्धमिमं त्वं यदि रक्षसि ।
बहुलोकाश्रयं मेऽङ्ग कथं सुतमुपेक्षसे" ॥ ३ । ३७ ॥
अथाभ्यधान्महात्मा स वचोभिः शबरस्य तैः ।
बध्यस्य दृष्टिपातैश्च विक्लवैर्विवशीकृतः ॥ ३ । ३८ ॥
किरात कातरो माभूः स्वयं संरक्ष्यते मया ।
बहुबन्धुस्तव सुतो बध्योऽप्ययमबान्धवः ॥ ३ । ३९ ॥
उपहारीकरोम्येनं चण्डिकायै स्वविग्रहम् ।
अयि प्रहर निःशङ्कं जीवत्वेतज्जनद्वयम् ॥ ३ । ४० ॥
तदद्भुतमहासत्त्वचित्तोदात्तत्वविस्मितः ।
उन्मिषद्रोमहर्षस्तं ततः स शबरोऽभ्यधात् ॥ ३ । ४१ ॥
अतिकारुण्यमिषतस्तवायं पृथिवीपते ।
कश्चिन्मतिविपर्य्यास-प्रकारो हृदि रोहति ॥ ३ । ४२ ॥

---

३ । ३५ ॥ ममायं पुत्रः पीडया मुमूर्षुस्तिष्ठति । देववाणी चेयं श्रूयते यत् चण्डिकासमीपे अस्य अनाथशिशोर्वधात् पुत्रस्य मे किंचित् श्रेयः भविष्यति, जीवेद् वाऽयं शिशुः ।

३ । ३६ ॥ अस्य शिशोः वधं विना, एष मे नन्दनः मरिष्यति, बन्धवश्च मे प्राणांस्त्यक्ष्यन्ति ।

३ । ३७ ॥ अयं तावदनाथो बालो मया वनगहने प्राप्तः । त्वमिमं रक्षसि चेत् सुतो मे प्राणान् हास्यति ।

३ । ३९ ॥ हे किरात ! अलं तव विलपितेन, स्वयमेवाहं तव पुत्रम् अनाथमिमं शिशुं च जीवयिष्यामि ।

३ । ४० ॥ तव पुत्रप्राणरक्षार्थं ममात्मदेहमेव चण्डिकायाः उपहारीकरिष्यामि । अतस्त्वं मां आलोक्य निर्भयं प्रहर ।

३ । ४१ ॥ शबरस्तस्य राज्ञः महासत्त्वमुदारतां च पर्य्यालोक्य विस्मितः अभूत् ।

३ । ४२ ॥ व्याध उवाच—हे नरनाथ ! परस्यार्थे प्राणांस्त्यजतस्तव मतिभ्रंशमेव तर्कयामि !

त्रैलोक्यजीवितेनापि यो रक्ष्यो हेलयैव सन् ।
पृथिवीभोगसुभगं कथं कायमुपेक्षसे ॥ ३ । ४३ ॥
न मानं न यशो नार्थान् न दारान् न च बान्धवान् ।
न धर्म्मं न सुतान् भूपा रक्षन्ति प्राणतृष्णया ॥ ३ । ४४ ॥
तत् प्रसीद प्रजानाथ मा बध्येऽस्मिन् कृपां कृथाः ।
शिशुश्चैव प्रजाश्चैता जीवन्तु त्वयि जीवति ॥ ३ । ४५ ॥
उपजिहीर्षुरात्मानं दन्तद्योतार्घपुष्पकैः ।
अर्च्चयन्निव चामुण्डामथोवाच स पार्थिवः ॥ ३ । ४६ ॥
सदाचारसुधास्वादे के भवन्तो वनौकसः ।
जाह्नवीमज्जन-प्रीतिं न जानन्ति मरुस्थिताः ॥ ३ । ४७ ॥
ध्रुवापायेन कायेन क्रीणतः कीर्त्तिमव्ययाम् ।
ममाभीष्टं प्रमार्ष्टुं ते मूढ रूढोऽयमाग्रहः ॥ ३ । ४८ ॥
मा वोचः किंचिदपरं प्रहर्त्तुं चेद् घृणा तव ।
न किं निजकृपाणो मे शक्तः प्रक्रान्तसिद्धये ॥ ३ । ४९ ॥
इत्युक्तः स स्वयं देहमुपहर्त्तुं समुद्यतः ।
खण्डनाय स्वमुण्डस्य विकोषं शस्त्रमाददे ॥ ३ । ५० ॥
ततः प्रहर्त्तुकामस्य तस्य द्युकुसुमैः शिरः ।
करश्च दिव्यवपुषा रुद्धः केनाप्यजायत ॥ ३ । ५१ ॥
अथापश्यत् तथाभूतः कांचिद्दिव्याकृतिं पुरः ।
न चण्डिकां न तं वध्यं न किरातं न दारकम् ॥ ३ । ५२ ॥
स तं दिव्यस्तदाभाषीद् मां त्वं सत्त्ववशीकृतम् ।
विद्धि मध्यमलोकेन्दो वरुणं करुणानिधे ॥ ३ । ५३ ॥

---

३ । ४४ ॥ तुलनीया मनुः "आत्मानं सततं रक्षेद्दारैरपि धनैरपि" ।

३ । ४५ ॥ त्वयि जीवति सति ममायं पुत्रः तव प्रजाश्च प्राणिष्यन्ति ।

३ । ४७ ॥ वनौकसः—वनवासिनः । यूयमरण्यनिवासिनः कथंकारं सदाचाराणाममृतस्वादं ज्ञास्यथ ? मरुवासिनो जना न कदापि गङ्गाजलावगाहनसुखं विदन्ति ।

३ । ४८ ॥ मम प्राणरक्षार्थं तवायमाग्रहो वृथा । अव्ययं यशोऽधिगन्तुमहं आत्मप्राणैरपरस्य प्राणान् रक्षिष्यामि ।

३ । ४९ ॥ प्रक्रान्तसिद्धये—अभीष्टसिद्ध्यर्थम् ॥

३ । ५३ ॥ हे मध्यमलोकेन्दो (पृथिवीलोकचन्द्रमः) त्वं मां वरुणं विद्धि ।

यदेतत् त्वामुपास्तेऽग्र छत्रं तन्मत्पुरात्पुरा ।
महाबलोऽहरद् भौमः पुराणश्वशुरस्तव ॥ ३ । ५४ ॥
रसातलैकतिलकं राजन् छत्रमिदं विना ।
उपद्रवाः प्राणहराः पौराणां नः पदे पदे ॥ ३ । ५५ ॥
तदिदं प्राप्तुकामेन त्वदौदार्य्यं परीक्षितुम् ।
कारुण्यमय मायेयं निर्माायि मयेदृशी ॥ ३ । ५६ ।

* * * *

नम्रः सम्राडयेवं स वदतो यादसां प्रभोः ।
चकार पूजां स्तोत्रेण कृपेण च कृताञ्जलिः ॥ ६२ ॥

ततः स वरुणः अशेषप्राणिनां प्राणभूतं तच्छत्रमादाय राज्ञे प्रहृष्य च वरमपि प्रदाय प्रीतः प्रतस्थे । मेघवाहनोऽपि नरपतिः सर्व्वां तां देवीं मायामतीत्य वरुणवरप्रसादतः सपरिवारो लङ्कां ययौ ।

अन्येद्युर्विस्मयस्मेरैर्बलैः सीमन्तयन् जलम् ।
प्रभावस्तम्भितक्षोभं प्रोत्ततार स वारिधिम् ॥ ३ । ७२ ॥

* * * *

गत्वा तु राक्षसकुलं प्राणिहिंसां निषिध्य सः ।
स्वमण्डलं प्रति कृती न्यवर्त्तत नराधिपः ॥ ३ । ७६ ॥

* * * *

अतिक्रामति कालेऽथ कोऽपि शोकाकुलो द्विजः ।
पुत्रं गदार्त्तमादाय द्वारि चक्रन्द भूपतेः ॥ ३ । ८२ ॥
दुर्गया प्रार्थितं राजन् पश्वाहारं विनैव मे ।
अनन्यसन्ततेः सूनुर्ज्वरेणाद्य विपद्यते ॥ ३ । ८३ ॥

---

३ । ५४ ॥ एतद्धि छत्रं पुरा तव श्वशुरस्य जनकः राजा नरकासुरः (प्राग्ज्योतिषाधिपतिः) मम पुराद् बलेनाहरत् । भौमः = नरकासुरः ।

३ । ५५ ॥ इदं हि छत्रं रसातलवासिनां (वरुणलोकस्थितानां प्राणिनाम्) एकमात्रं उपादेयं वस्तु ।

३ । ७२ ॥ जलं सीमन्तयन् = जले रेखाविशेषं पातयन् स मेघवाहनः वरुणप्रभावेण सुस्थिरं सागरमुत्तीर्य्य लङ्कां गतवान् ।

३ । ८२ ॥ गदार्त्तम् = रोगपीड़ितम् ।

३ । ८३ ॥ भगवती दुर्गा पशुबलिं प्रार्थितवती । हे राजन् भवदादेशाद् देशतोऽस्मात् पशुबलिर्निवारितः । अतोऽहं पशुदानेऽसमर्थः । मम पुत्रोऽपि अतः कारणाद् एव प्राणांस्त्यक्ष्यति ।

यद्यहिंसादरेणेमं सुतं नृप न रक्षसि ।
एतन्मरणे तत्कोऽन्यो निमित्तं प्रतिभाति मे ॥ ८४ ॥
निर्णयो वर्णगुरुणा त्वयैवैष विधीयताम् ।
ब्राह्मणस्य पशोर्वापि प्राणानां कियदन्तरम् ॥ ८५ ॥
तपःस्थान् अपि ये जघ्नुर्ब्राह्मणप्राणहेतवे ।
हा मातस्तेऽधुना भूपा नूनं महि ! तिरोहिताः ॥ ८६ ॥
इति ब्रुवति सावेगं शोककातरं द्विजे ।
आपदार्तिहरो राजा चिरमेवं व्यचिन्तयत् ॥ ८७ ॥
न वध्याः प्राणिन इति प्राङ्मया समयः कृतः ।
द्विजार्थमपि किं कुर्य्यां स प्रतिज्ञातविप्लवम् ॥ ८८ ॥
निमित्तीकृत्य मामद्य विपद्येत द्विजो यदि ।
तदाप्यत्यन्तपापीयान् अर्थैः संकल्पविप्लवः ॥ ८९ ॥
नैति मे संशयभ्रान्तमेकपक्षावलम्बनम् ।
संभेदावर्त्तपतितं प्रसूनमिव मानसम् ॥ ९० ॥
ततस्स्वदेहोपहारेण दुर्गां तोषयता मया ।
प्रतिज्ञया समं न्याय्यं रक्षितुं जीवितं द्वयोः ॥ ९१ ॥
इति संचिन्त्य सुचिरं देहदानोद्यतो नृपः ।
"श्वः प्रियं तव कर्त्ताऽस्मी"त्युक्त्वा विप्रं व्यसर्ज्जयत् ॥ ९२ ॥
क्षपायां क्ष्मापतिमथ स्वमुपाहर्त्तुमुद्यतम् ।
निषिध्य दुर्गा व्यधित प्रकृतिस्थं द्विजन्मजम् ॥ ९३ ॥

इत्थं बहुशः प्रशंसनीयं जीवनमतिवाह्य कीर्त्तिमानसो नरपतिः राज्यलक्ष्मीं चतुस्त्रिंशतं समाः भुक्त्वा अचिरममरपुरमधिचकार ।

---

८५ ॥ वर्णगुरुणा = त्वया राज्ञा ।

८६ ॥ तपःस्थान् = तपसि स्थितान् मुनीनपि ।

८८ ॥ समयः = शपथः । प्रतिज्ञातविप्लवम् = प्रतिज्ञाभङ्गम् ।

८९ ॥ संकल्प–विप्लवः = संकल्पच्युतिः, अहिंसाव्रतेभ्यः स्खलनम् ।

९० ॥ संभेदावर्त्तपतितम् = नद्योः सङ्गमस्थाने य आवर्त्तः, तत्र पतितं कुसुममिव मनो मे एकपक्षावलम्बनं न एति ।

९३ ॥ द्विजन्मजं = ब्राह्मणसुतं । प्रकृतिस्थं = सुस्थं । व्यधित = कृतवती ।

योषितोरालापः ।

प्रथमा ।—अयि चिराद्दृष्टासि । अपि कुशलं ते ?

द्वितीया ।—आर्य्ये, अनवसरोऽयं कुशलप्रश्नः । पुत्रकस्य मे शोच्या गतिः सञ्जाता ।

प्रथमा ।— अहह, किमत्याहितं तस्य ।

द्वितीया ।—न अत्याहितम् । हन्त, परवशीकृतोऽसौ ।

प्रथमा ।—केन ? व्याधिना ? भवतु, निरामयो भविष्यति ।

द्वितीया ।—आर्य्ये ! नायं साधारणो व्याधिः । पत्न्या स पारवश्यं नीतः ।

प्रथमा ।—कथमिति ?

द्वितीया ।—अहो किं कथयामि ? कथयन्त्या अपि मे हृदयं द्विधा भवितुमिच्छति । स खलु अहर्निशं सेवक इव तामेवानुवर्त्तते, पार्श्वे च तस्या न कथमपि मोक्तुमिच्छति । विवाहात् प्रभृत्येव वत्सस्य ईदृशी दशा समापतिता । सापि हताशा एवं कुर्व्वन्तमेव तं बहु मन्यते न च वारयति, नापि मदुक्तमाद्रियते । किं बहुना, मुषिताऽस्मि तया दुष्कुलया । तनयो मे तदीयः संवृत्तः । अहो मायाविनीं राक्षसीमहं वधूरूपेण गृहं प्रावेशयम् ।

प्रथमा ।—चिन्तां मा कार्षीः । तनयस्ते पुनस्त्वदीय एव भविष्यति ।

द्वितीया ।—महती भीतिर्मां बाधते । व्याधिरयम् दुश्चिकित्स इव प्रतिभाति । अपि जानासि किमप्यौषधमस्य ? सत्यनारायणपूजापि मया सङ्कल्पिता ।

प्रथमा ।—भवतु, पूजय सत्यनारायणम् । अपगमिष्यति तस्य पत्नीपारवश्यम् । अत्र मा आकुला भूः । ईदृश्यव रीतिरिदानीन्तनानां पुत्रकाणाम् । ते मातरमुल्लङ्घ्य पत्नीमाद्रियन्ते । कलेरयं प्रभावः । कः पुनर्वृत्तान्तस्ते जामातुः ?

द्वितीया ।—(सपरितोषम्) अहो जीवतादायुष्मान् वर्षशतम् । ईदृशो जामाता महता पुण्येनैव लभ्यते । प्राणेभ्योऽपि तस्य प्रियतरा मे वत्सा । आस्तामन्यत् सर्व्वम्, तस्याः अनुमतिमन्तरेण स गृहाद् बहिर्गन्तुमपि नोत्सहते । तद्गतप्राण एवासौ । युष्माकमेवाशिषा वत्सया ईदृशो वरो लब्धः । धन्यम्मन्याहम् जामातृलाभेन ।

प्रथमा ।—(सान्तर्हासम्) विज्ञातोऽस्मि । भवतु गच्छामि । अतिक्रामति स्नानवेला ।

श्रीश्रीसरस्वत्यै नमः ।

संस्कृत भारती

भागः २, २य वर्षम्] १३२६ मितवङ्गाब्दस्य १मांघे [संख्या ६

श्रीश्रीकृष्णाष्टकम् ।

(१)

गीर्वाणवृन्दस्तुतपादयुग्मम्
क्षीराब्धिकन्याश्रितवामभागम् ।
भृत्यार्त्तिपापक्षयकारकञ्च
वन्देऽनिशं गोपयुतं परेशम् ॥

(२)

गोविन्ददेवं परमार्च्चनीयं
दूर्व्वादलाभं धृतशङ्खपद्मम् ।
लक्ष्म्या सनाथं रमणीयमूर्त्तिम्
वन्देऽनिशं गोपयुतं परेशम् ॥

(३)

गोपालकृष्णं करुणानिधानं
नारायणं पद्मपलाशनेत्रम् ।
लोकेश नित्यं शरणं जनानां
वन्देऽनिशं गोपयुतं परेशम् ॥

(४)

योगेशलक्ष्मीपतिमच्युतं तम्
गोलोककान्तं परमेशशान्तम् ।

वैकुण्ठराधाधवमिन्दिरेशं
वन्देऽनिशं गोपयुतं परेशम् ॥

(५)

केयूरवन्तं दितिसूनुशत्रुं
श्रीवत्सचिह्नं ध्वजलक्ष्मपादम् ।
दामोदरं माधवपीतवस्त्रम्
वन्देऽनिशं गोपयुतं परेशम् ॥

(६)

यद्वातमिन्द्रावरजं पुराणं
कंसारिसत्यं वसुदेवपुत्रम् ।
योगीन्द्रचित्ते सततं वसन्तं
वन्देऽनिशं गोपयुतं परेशम् ॥

(७)

प्रह्लादपूज्यं वनमाल्यभूषं
श्रीकैटभारिं पुरुषोत्तमञ्च ।
ईशानचिन्त्यं कलिकल्मषघ्नं
वन्देऽनिशं गोपयुतं परेशम् ॥

(८)

पक्षीन्द्रकेतुं यदुवंशकेतुं
विश्वम्भरं केशवमादिनाथम् ।
राजीवनाभं हरिमिन्द्रियेशं
वन्देऽनिशं गोपयुतं परेशम् ॥

श्रीयामिनीरञ्जनविप्रदिष्टं, कल्याणदं मोक्षयशोदमर्च्यम् ।
कृष्णाष्टकं रम्यमिदं प्रभाते, नित्यं पठेद् यो लभते सुखं सः ॥

शार्व्वरी-सम्बोधनम् ।

यवश्रीक-समय-दीर्घ-दिवसं हे शर्व्वरीदेवते
स्यूतः स्वप्नपटस्त्वया सुखशुचां यस्मिन् रहःसंस्थया ।
तत्पूर्व्वाचलगूढ़कन्दरगृहात् सौम्ये च भीमे द्रुतं
निर्गत्य प्रसर त्वमस्तजलधिस्त्यायत्तरङ्गावधि ॥ १ ॥

तारारत्नसमुज्ज्वलासितनभः-प्रावारकेणावृता
प्रौढ़ैर्बोन्मदचुम्बनैः कुरु भृशं खेदालसं वासरम् ।
तस्यालोकदृशं पिधेहि च तमःकेशैस्ततः सञ्चर
त्वं भूमौ च जले विमोह्य निखिलं हे मच्चिरप्रार्थिते ॥ २ ॥

दूये त्वामनु देवि ! दृष्टिपदवीमायात्युषा मे यदा
पश्याम्यूर्द्ध्वगतं यदा रविकरं भूमौ च नष्टं हिमम् ।
मध्याह्नं विधुरीकृतद्रुमलतापुष्पं दिनान्तं तथा
प्रत्याख्यातमिवातिथिं श्लथगतिं दृष्ट्वा विदूयेऽप्यहम् ॥ ३ ॥

ऊचे यामिनि सोदरस्तव यमः किं मामरे ! लिप्ससे
निद्रा नाम च कन्यका तव निशे ! मुग्धालसप्रेक्षणा ।
मामाह भ्रमरस्वनैरिदमये मामिच्छसि प्रेयसीम् !
सद्यस्तावदहमब्रवं न हि युवामभ्यर्थये गच्छतम् ॥ ४ ॥

मृत्युः श्लिष्यतु मां तदैव भवती चेन्मृत्युना यास्यते
निद्रा चुम्बतु मां तदा प्रियतमे ! त्वञ्चेद्विमुञ्चेर्जगत् ।
याचे किञ्चिदुपायनं न हि शुभे मद्वल्लभे शर्व्वरि !
त्वं साक्षादुपयाहि मां लघुगतिर्भीः स्वागतं स्वागतम् ॥ ५ ॥

प्रतीच्यकवेः 'शेली'ति नामधेयस्य
'रात्रिं प्रती'ति कविताविशेषः अनूदितः ।

ऋतु-वर्णनम् ।

विज्ञापयन् नूतनवर्षयोगं सन्दीपयन् वासरराजकान्तिम् ।
सन्तापयन् विश्वमशेषमुग्र ऋतुः समायाति निदाघनामा ॥ १ ॥
तदा सुदीर्घा दिवसा नितान्तं सदा सहस्रांशुकरेण तप्ताः ।
सन्तापयन्तोऽखिलजीवदेहान् यच्छन्ति घर्म्मोदकबिन्दुमालाः ॥ २ ॥
सन्तप्तभास्वत्किरणैर्व्वियुक्ता दिनक्षये सौम्यवपुर्दधाना ।
प्रफुल्लपुष्पौघसुगन्धिताशा पृथ्वी जनानां सुखमातनोति ॥ ३ ॥
तदा सरस्यो विमलाश्च नद्यो जीवोपभोगक्षमवारिशून्याः ।
यथा कृतार्थो गृहिणास्तथामूः शोच्या लभन्ते परमं कृशत्वम् ॥ ४ ॥
तस्मिन्नृतौ पक्वफला रसालाः कुर्व्वन्ति तृप्तिं परमां जनानाम् ।
रम्याः सुदीर्घाकृतिनारिकेलाः फलाम्बुभिः संजनयन्ति शान्तिम् ॥ ५ ॥
परोपतापः पतनाय पुंसामिति प्रवादं सुनृतं विधातुम् ।
प्रच्छादयन्ती रवितापमुग्रं प्रावृट् समागच्छति वृष्टिहेतुः ॥ ६ ॥
नीलाम्बुवाहस्थगितान्तरीक्षे विद्युत्प्रकाशा घनगर्ज्जनेन ।
भवत्यजस्रं जलवर्षणाच्च क्लेशावहः प्राणभृतां स कालः ॥ ७ ॥
तदा सरस्यः सरिदादयश्च भवन्ति मेघक्षरिताम्बुपूर्णाः ।
वृक्षा लताः स्युः सरसाः प्रफुल्ला दुःखं चिरं प्राणभृतां न तिष्ठेत् ॥ ८ ॥
ग्रीष्मे जलाभावनिपीडितेयं तदा समुच्छ्वासमुपैति पृथ्वी ।
नदन्ति भेकाः सततं प्रफुल्ला ग्लानिं चकोरा अपि संत्यजन्ति ॥ ९ ॥
कुर्व्वन्ति नृत्यं शिखिनः प्रहृष्टा गायन्ति रम्यं श्रुतिशान्तिकारि ।
वृष्ट्यम्बुपूर्णासु महीषु तुष्टा वपन्ति शस्यानि कृषीवलाश्च ॥ १० ॥
ततो जलापायविपाण्डुमेघैः सुरम्यनीलाम्बरमुद्वहन्ती ।
श्यामौषधीराजितदिग्विभागा शरत् समागच्छति चित्ररूपा ॥ ११ ॥
वृद्धिं लभन्ते तृणगुल्मवृक्षा, स्तन्वन्ति शोभां परमां धरायाः ।
तदा नदीनां सरसाञ्च हंसाः स्वच्छेषु कुर्व्वन्ति जलेषु केलिम् ॥ १२ ॥
सरांसि राजन्ति जलैः प्रसन्नै र्जलानि राजन्ति मनोज्ञपद्मैः ।
राजन्ति पद्मानि सुनीलभृङ्गै र्भृङ्गा विराजन्ति सुगुञ्जितैश्च ॥ १३ ॥
मेघोपरोधेन तदा विमुक्ताः सर्व्वा दिशो हन्त नभश्च नीलम् ।
सूर्य्यातपो राजति निर्व्विपत्तो हृष्टाश्च गायन्ति कलं विहङ्गाः ॥ १४ ॥

प्रफुल्लपुष्पौघसुवर्णिताङ्गी विहङ्गसङ्गीतवती मनोज्ञा ।
मन्ये शरच्चन्द्रकरैः सहासा पृथ्वी प्रसन्ना सरसा निशासु ॥ १५ ॥
विपाचयञ् शालिचयानशेषं कृतार्थयन् कर्म कृषीवलानाम् ।
संकोचयन् भास्करतापमुग्रं हेमन्तकालो भुवने समेति ॥ १६ ॥
न चातिशीतं न च तीव्रउष्मा न विद्यते वारिदवर्षणं वा ।
न चात्र वात्या प्रबला कदाचित् संपीड़िताञ् जीवगणान् करोति ॥१७॥
अस्मिन्नृतौ जीवगणाः सुखेन कुर्व्वन्ति कर्म्माणि दिनेषु सुस्थाः ।
निशासु निद्रां विमलां लभन्ते प्रीत्याखिलस्तिष्ठति जीवलोकः ॥ १८ ॥
कुत्रापि शस्यानि नवोद्गतानि क्वचिच्च लूनानि पुरातनानि ।
क्षेत्रेषु दृष्ट्वा कृषिकर्म्मविज्ञाः परं प्रमोदं कृषका लभन्ते ॥ १९ ॥
पतन्ति नक्तं धवलास्तुषाराः फुल्लानि पुष्पाणि गृहेषु भान्ति ।
ह्रस्वान्यहानि क्षणदाश्च दीर्घा जगद्विचित्रं समयं बिभर्त्ति ॥ २० ॥
तुषारवर्षं सततं वितन्वन् धरां समग्रां शिशिरां प्रकुर्व्वन् ।
प्रकम्पयन् प्राणभृतां शरीरं शीतर्त्तुरागच्छति भीमरूपः ॥ २१ ॥
अस्य प्रभावं किमु वर्णयामः चन्द्रोऽपि तन्द्रां लभते निशायाम् ।
शिखापि वह्नेः सुसहा शरीरे मन्दातपो येन दिवाकरोऽपि ॥ २२ ॥
शीतार्हवस्त्रावृतसर्व्वकायाः कुर्व्वन्ति शीतोपशमं मनुष्याः ।
शीतार्तकाया दहनं निषेव्य दीना निशायां शमयन्ति शीतम् ॥ २३ ॥
तुषारपातक्षतपद्मशोभा जलाशया न श्रियमावहन्ति ।
तुषारमिश्रेषु जलेषु तेषां न मानवाः स्नानसुखं लभन्ते ॥ २४ ॥
सायं निशायां पतितैस्तुषारैः स्तथा प्रभाते परिपुष्टिमन्ति ।
क्षेत्रेषु शस्यानि मनोरमाणि शोभां लभन्ते कुसुमैः फलैश्च ॥ २५ ॥
ततो मनोहारिनवप्रवालै र्नवप्रसूनै र्व्विविधैः सुरम्यैः ।
विभूषयन् वृक्षलताः प्रकामं कान्तो वसन्तो भुवने समेति ॥ २६ ॥
रसालवृक्षे मुकुला नवीना भृङ्गावलिस्तत्र चिरं निषण्णा ।
तनोति नादं मधुरं प्रमत्ता पश्यन्ति पान्था अतिमुग्धचित्ताः ॥२७॥
धीरः समीरः सुखयञ् शरीरं दिशः शनैः सर्पति दक्षिणस्याः ।
फुल्लप्रसूनासु लतासु सक्त स्तनोति गन्धं विमलं गुणज्ञः ॥ २८ ॥
मनोहरैश्चन्द्रकरै रजन्यां श्वेतीकृतायां भ्रमराः प्रफुल्लाः ।
पद्मेषु पुष्पेषु जले वने च कुर्व्वन्ति मत्ता गतमागतञ्च ॥ २९ ॥

रक्तं रसालस्य नवप्रवालं भुक्त्वान्यपुष्टः खलु रक्तकण्ठः ।
मन्ये वसन्तस्य गुणान् प्रगातुं कुहूरवं संतनुते मनोज्ञम् ॥ ३० ॥

भारवि-काव्य-विमर्शः ।

प्रसिद्धेषु संस्कृतभारतीनिबद्धेषु महाकाव्येषु महाकविभारवेः कृतिः किरातार्ज्जुनीयं तावदन्यतमम् । अस्मद्देशे पण्डितसम्प्रदायेऽस्य चिरात् प्रभृति अध्ययनमध्यापनञ्च प्रसिद्धमस्ति । वङ्गदेशीयविश्वविद्यालयेऽप्यंशविशेषोऽस्य काले काले पाठ्यत्वेन निर्द्दिश्यते । एवं शिक्षितसम्प्रदाये लब्धप्रवेशस्य सुविदितस्यापि काव्यस्यास्य विमर्शे यदस्माकमपीयं प्रवृत्तिस्तत्रास्य गुणवत्तैव परं प्रयोजिका, प्रसिद्धैव हि गुणविशेषाणामाकर्षणीशक्तिः ।

काव्यस्यास्य गुणविमर्शावसरे प्रथमं तावद्दीप्तं प्रसादगुणमेव निर्द्दिशामः । ओजस्विनी गाम्भीर्य्यवती च भारवे भारती प्रायेण सर्व्वत्रैव प्रसादगुणभूषितेति महाननन्यसाधारणोऽस्या गुणोत्कर्षः । मन्यामहे महाकविरपि आत्मनो धन्यम्मन्य-त्वमासीत्, यथाहि-स्थाने खलु स्वकाव्यस्य प्रसन्नगम्भीरत्वमेव मर्मसिकृत्य तेनोक्तम्,—

"विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम् ।
प्रवर्त्तते नाकृतपुण्यकर्म्मणां प्रसन्नगम्भीरपदा सरस्वती ॥" १४।३ अन्यत्र च
"स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥" २ । २७

वयमपि सर्व्वान्तःकरणेन समर्थयामहे यत् "प्रवर्त्तते नाकृतपुण्यकर्म्मणां प्रसन्नगम्भीरपदा सरस्वती" । भारविकाव्ये च "स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् । रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ।" नूनं सर्व्वेषां सहृदयानां संस्कृतभारतीसेविनामत्रैकमत्यं भवेत् । धन्यानन्यसामान्या सचेतसामनुभवगम्या च भारवेः "प्रसन्नगम्भीरपदा सरस्वती ।" प्रसिद्धा खलु महाकविकालिदासस्य काव्येषु माधुर्य्यवती रचना, परं न प्रायशस्तेष्वपि भारविकाव्यवदोजस्विनी सरस्वती । प्रसादगुणगुम्फितेऽपि भारविकाव्ये भाषा भावानुकूला बहुचैव पुष्णाति परमोजः । प्रथमसर्गे युधिष्ठिरं प्रति तृतीयसर्गे चार्ज्जुनं प्रति द्रौपद्या उक्तिम् एकादशसर्गे इन्द्रार्ज्जुनसंवादं त्रयोदशचतुर्द्दशसर्गनिबद्धे वनेचरार्ज्जुनयोरुक्तिप्रत्युक्ती चात्र दिङ्मात्रमुदाहरामः ।

द्वितीयतस्तावत् काव्यसौन्दर्य्यमालोचयामः । वाङ्मयी कृतिरेषा भारवेः प्रसन्ना सालङ्कृतिश्च । अलङ्कारसन्निवेशस्तु प्रायेण सर्व्वत्रैव अक्लेशेन कृत इति प्रतिभाति । यत्र यस्य रसस्य यत्र वा यस्यालङ्कारस्योपयोगिता तस्य तस्य तत्र तत्र स्वत इव निष्पत्तिरित्यहो रचनाशैली महाकवेः । अर्थान्तरन्यासेऽद्वितीयोऽयं महाकविरिति नः प्रतिभाति, यथा सकलकविशिरोमणेः कालिदासस्य "एवं हि सर्व्वत्र गुणैर्निधीयते" "शरीरमाद्यं खलु धर्म्मसाधनम्" इत्येवंजातीयाः श्लोकपादाः प्रवादवाक्ये परिणताः । एवं भारवेरपि "हितं मनोहारि च दुर्लभं वचः" "ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः" इत्येवम्प्रकारा अद्याप्युदाह्रियन्ते वाचोयुक्तयः । अपिच "अहो दुरन्ता बलवद्विरोधिता" "प्रकर्षतन्त्रा हि रणे जयश्रीः""वसन्ति हि प्रेम्णि गुणा न वस्तुनि" "न रम्यमाहार्य्यमपेक्षते गुणम्" "सा लक्ष्मीरुपकुरुते यया परेषाम्" "हरति मनोमधुरा हि यौवनश्रीः" "दुःखिते मनसि सर्व्वमसह्यम्" "विशत्यपायं हि सतामतिक्रमः" इत्येवंविधाः सरसपदविन्यासाः पद्यपादाः पठनमुहूर्त्तादेव स्पृशन्ति हृदयं चिरञ्च तिष्ठन्ति स्मृतिपथारूढाः सहृदयानाम् । अर्थगौरवञ्च प्रतिपद्यमनुभूयमानं प्रतिपादयति सार्थकतां भारवेरर्थगौरवमिति प्रवादवाक्यस्य । "विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः । स तु तत्र विशेषदुर्ल्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥ २ । ३" इत्येवमादिषु पद्येषु भावगाम्भीर्य्यं भाषायाश्च तदनुगुणत्वं सहृदयसंवेद्यमेव । स्वभावोक्त्यलङ्कारभूषिता च स्थाने स्थाने भारविकविता वनलतेव निसर्गसौन्दर्य्याभरणा नितरां मनोहारिणी । तत्र दिङ्मात्रं "स गतः क्षितिमुष्णशोणितार्द्रैः खुरदंष्ट्राग्रनिपातदारिताश्मा, असुभिः क्षणमीक्षितेन्द्रसूनुर्विहितामर्षगुरुध्वनिर्निरासे ॥ १३ । ३१ ॥" इति पद्यं वर्णनानैपुण्येनालेख्यमिव तत्तदुपस्थापयति पुरः पाठकानाम्, एवमन्यत्रापि सुधीभिः स्वयं द्रष्टव्यम् । हृदयस्पर्शिनी स्वाभाविकी वर्णना च कवेः प्रथयति रचनाप्रावीण्यम् । तत्र शरद्वर्णनम् हिमाचलवर्णनम्, सुराङ्गनाजलकेलिरर्ज्जुनविलोभनप्रत्याख्यानम्, किरातसैन्येन तथा कपटकिरातवेषेण भगवता धूर्जटिनार्ज्जुनस्य युद्धम् इत्यादिषु स्थलेषु यद्रचनासौन्दर्य्यमाविष्कृतं तत्रभवता महाकविना तत् सर्व्वथा विश्लेषणमर्हं केवलमुपभोग्यं काव्यमर्म्मज्ञानां रसिकानाम् । अर्ज्जुनतपस्याभिगमनात् प्राग् द्रौपदीचित्राङ्कनप्रवृत्तस्य महाकवेः सालङ्कृतेर्वाग्भङ्गिमतेरुदाहरणतया श्लोकद्वयमधस्तादुद्ध्रियते यथा—

"तान् भूरिधाम्नश्चतुरोऽपि दूरं विहाय यामानिव वासरस्य ।

एकीघभूतं तदशमे कृष्णां विभावरीं ध्वान्तमिव प्रपेदे ॥" ३ । ३५
"तुषारलेखाकुलितोत्पलाभे पर्य्यश्रुणी मंगलभंगभीरुः ।
अगूढभावापि विलोकने सा न लोचने मीलयितुं विषेहे ॥" ३ । ३९

एवं प्रायशः सर्व्वत्रैव सरसा रचना हरति मनः सहृदयानाम् । केवलं पञ्चदशसर्गे चित्रकाव्येषु प्रसादगुणस्याभावादवश्यम्भावि दुर्व्वोधत्वं वैरस्यञ्चापादितम् । अङ्गस्यातिविस्तृतिरित्यत्र काव्ये सुराङ्गनाविहारादि साहित्यदर्पणकारेण रसदोषस्योदाहरणतया यदाक्षिप्तम्, तत्रापि ओमिति ब्रूमः । परमेतद् वक्तव्यम् माघकाव्ये तादृशस्थले अनङ्गस्याभिधानं यथा वैरस्यावहं काव्येऽस्मिन्नङ्गस्यातिविस्तरं तथा न प्रतीमः । न हि सर्व्वथा निर्द्दोषं काव्यमित्यत्र कविवचनमेव स्मारयामः । "नाल्पीयान् बहु सुकृतं हिनस्ति दोषः ।"

सत्यप्येवं भारविकाव्ये बङ्गदेशीयपण्डितसमाजे माघकाव्यस्य भूयान् समादरो दृश्यते । वयन्तु जानीमः माघकाव्यं भारविकाव्यस्यैवानुकृतिः न पुनस्तथा प्रसादोज्ज्वलं हृदयङ्गमं वा । नु च "तावद्भा भारवेर्भाति यावन्माघस्य नोदयः" इति विचारसहं वचः । तृतीयतः काव्येऽस्मिन् किरातार्ज्जुनीये मूलानुसन्धानेनैव कविकल्पनायाः नवीनत्वं विचारयामः । महाकाव्यमिदं कविमुख्यानामुपजीव्यभूतस्य महाभारतस्य वनपर्व्वान्तर्गतं कैरातपर्व्वाधिकृत्य विरचितमिति विदितमेव सर्व्वेषाम् । तथापि तत्र तत्र कल्पनाकुशलेन महाकविना भारविणा नवीना सृष्टिरिह पदं कारिता । काव्यस्यास्य प्रथमसर्गे युधिष्ठिरं प्रति वनेचरोक्तिः चयोदशचतुर्द्दशयोर्वनेचरार्ज्जुनसंवादः किरातसैन्येन पार्थस्य युद्धञ्च सर्व्वथा कविनैव कल्पितानि । काव्यवर्णितं व्यासादर्ज्जुनस्य विद्याग्रहणं यक्षसाहाय्येन हिमवति प्रस्थानञ्च न मूलमनुसरतः, तत्र हि युधिष्ठिरस्य व्यासादर्ज्जुनस्य च युधिष्ठिराद्विद्याग्रहणं योगबलेन चार्ज्जुनस्य लघु प्रस्थानमित्यादिकं कथाजातम् । आकरग्रन्थे शङ्करायार्पितं माल्यादिकं किरातपतिशिरोनिबद्धमेवानुपश्यतः पार्थस्य तत्स्वरूपपरिज्ञानमुपनिबद्धम् । भारविकाव्ये तु नियुद्धावसरे पार्थकृतेन पादग्रहणेन परितोषितस्याशुतोषस्य स्वरूपेणाविर्भावः सम्यग् रमणीयतया कल्पितः । एवमनेकत्र मुनिसरणिमननुसरतापि तत्रभवता कविना कल्पनाचातुर्य्यैरावर्ज्जितानि चेतांसि रसिकानाम् ।

सम्प्रति कविकृतं चरित्रचित्रणं तद्द्वारेण च लोकशिक्षोपयोगिता काव्यस्यास्य विचार्य्यते । सकलकाव्यलक्षणसमन्विते भारविकाव्येऽस्मिन्नायकः धीरोदात्तो

मनस्वी धनञ्जयः, प्रतिनायकश्च कपटकिरातवेषो भगवान् धूर्जटिः । नायिका राजपुत्री याज्ञसेनी तेजस्वितायाः मूर्त्तिरिव कल्पिता । उभावेव द्रौपदीधनञ्जयौ गुरोर्युधिष्ठिरस्य मुखापेक्षया शत्रुनिकृतिमसोढव्यामपि चिरं सोढवन्तौ इति काव्यपाठेन प्रतीयते । भारतेऽङ्कितं द्रौपदीचित्रं भारविकाव्ये न मनागपि हीयते प्रत्युत समुज्ज्वलतया दृक्पथमवतरति । यत्रापि सैव द्रौपदी यस्याः खलु कृष्णां प्रति "धिग्बलं भीमसेनस्य धिक् पार्थस्य च गाण्डिवम् । यत्र दुर्य्योधनः कृष्ण मुहूर्त्तमपि जीवति ॥" इत्येवमादयो भारतकाव्ये वज्रधूपिताः स्फुलिङ्गोत्किरा इव गिरः स्पृशन्ति नश्चेतांसि । तथैव भारविकाव्येऽपि धनञ्जयं प्रति ज्वालामयी वाक्छटास्याः, यथा,—

"दुःशासनामर्षरजोविकीर्णै रेभिर्विनाथैरिव भाग्यनाथैः ।
केशैः कदर्थीकृतवीर्य्यसारः कच्चित् स एवासि धनञ्जयस्त्वम् ॥" ३ । ४७
"स क्षत्रियस्त्राणसहः सतां यस्तत् कार्म्मुकं कर्म्मसु यस्य शक्तिः ।
वहन् द्वयीमप्यफलेऽर्थजाते करोत्यसंस्काररहतामिवोक्तिम् ॥" ३ । ४८
"वीतौजसः सन्निधिमात्रशेषा भवत्कृतां भूतिमपेक्षमाणाः ।
समानदुःखा इव नस्त्वदीयाः सरूपतां पार्थ गुणा भजन्ते ॥" ३ । ४९
आक्षिप्यमाणं रिपुभिः प्रमादान्नागैरिवालूनसटं मृगेन्द्रम् ।
त्वां धूरियं योग्यतयाधिरूढा दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥" ३।५०

अथास्मिन् काव्ये पार्थस्य तपश्चरणं सुराङ्गनाविलोभनप्रत्याख्यानञ्च रमणीयतया वर्णिते । एकादशसर्गे इन्द्रार्ज्जुनसंवादः पुनः परमरमणीयः । तत्र हि वसुधापि वासवेन तपसः परहिंसासाधनत्वेनानुष्ठानाचित्वार्य्यमाणस्य नायकस्य चरमतत्त्वस्थिताचलवदविचलत्वं साधु वर्णितम् ।

"वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम् । निर्व्वाणमपि मन्येऽहमन्तरायं जयश्रियः । विच्छिन्नाभ्रविलायं वा विलीये नगमूर्द्धनि । आराध्य वा सहस्राक्षमयशःशल्यमुद्धरे ॥"

इत्येवमूर्ज्जितया वाचा सूचितं स्थिरप्रतिज्ञत्वमर्ज्जुनस्य सत्त्रौचिती च । ईदृशस्यैव दृढत्वस्य फलं सकलभुवनवन्द्यपादाद्भगवतो धूर्जटेरस्त्रलाभश्चरमभागे वर्णितः । एवञ्च नायकवदर्ज्जयेत्तपसा सिद्धिमिति काव्यस्यास्य महानुपदेशस्तथा च लोकशिक्षोपयोगिता । चरमे ब्रूमः परमरमणीये काव्येऽस्मिन् कवेरात्मन एव तेजस्विता बहुत्र वाचा बहिरभिव्यक्तिं नीता । तत्र दिङ्मात्रं "कथं प्रसह्याहरणैषिणां प्रियाः;